कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-27703

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
हिकुवल्यानंद ~~भिदंज्ञेय~~	जगन्नाथ भट	वेदांग	पूर्ण	-	3/8	112	संस्कृत	कागद	12	25	शके 1688	

॥ श्रीकुवलयानंदपुस्तकारंभपत्रमिदंज्ञेयं ॥

१॥

श्रीगणेशायनमः॥ सूतउवाच॥ इस्मिंकोकोलरूपेण धरिणीहरि
पातया॥ पुनः प्रेपष्टतंदेवं प्रणमंती मुहुर्मुहुः॥१॥ धरिण्यु
वाच॥ ॥ त्वन्मुखाच्छ्रुतयान्येभ्यो नारदादि॥ भ्यएवच॥ श्रुत्वै
वंनिश्चयंचक्रुः शिवब्रह्मादयोपरे॥२॥ मुनयोदेवगंधर्वा
यक्षराक्षसपन्नगाः॥ नृणांत्वदंघ्रिरेकैव भवबंधविमो
चनी॥३॥ नान्यःपंथाभवेत्क्वापि मुमुक्षूणां भवार्णवात्॥३॥
त्वंसर्वदेवनिवहः परस्माच्चयंप्रभुः शार्वोद्दिकस्यगतिदोज
नकोभिवंदिता॥ दोलालयेवश्रामिता चपरांतकाले शाश्वंत्य
मेवनिखिले चचराचरेति॥४॥ निश्चिसचापिसुदृढं निखि
लास्वकीयास्त्री पुत्रदेहधनतोपि शोषतोये॥ स्नेहःसप्तवग
दितोमुनिर्भिर्हि भक्तैर्मुक्तिंददाति सतधापरिलुस्सईशाः॥५॥
नात्रवर्णाधिकापेक्षा नृणाश्रमवरिष्ठता॥ शरणागतमा

त्रेण गजेंद्रोहमापहि ॥६॥ एवं बहुविधाख्याना अंबरीषमुखाः पुरा ग
ति याता नहि पुनर्मीलुः स्तन्यंपि वं तिहि ॥७॥ सर्वदेवैस्त्वमेवैव घस्त्व
र्वयज्ञैस्त्वमीज्यसे ॥ स्तूयसे वै स्तेश्च नो नमो नमस्ते ह द्यौ च ॥८॥
इत्येवं वेदवाचो वै श्रूयते मुनिभिः सदा ॥ मयात्वन्मुखाच्चापि सु
दृढो निश्चयः कृतः ॥९॥ तथापि भगवन्नत्वा पुनः पृच्छामि
चादृता ॥ कृपया वद सर्वज्ञ कृपालो मामनुग्रह ॥१०॥ प्राप्ते कलि
युगे घोरे प्रायस्सन्तो बहिर्मुखाः ॥ भविष्यं जनाः स्वामिन्न
केचिद्भक्ता अपि त्वयि ॥११॥ अल्पायुषोल्पवित्ताश्च मंदज्ञा
नाश्च रोगिणः ॥ स्वकीयाचार चरणेप्य क्षमान्यपद स्पृहिः ॥१२॥
उपद्रुता स्तरिष्यंति कथं तेषां तद्वदस्व मे ॥ अल्पापि पापकृता प्रज्ञा
त्येद्भुता चरणादिका ॥१३॥ बहुस्यादसमर्तितेकाव चारस्याहि
तत्त्वतः ॥१४॥ श्रीवराह उवाच ॥ संसारे क्लिश्यमाणा

कुवलया

१

नं ८

॥ श्रीगणेशाय नमः॥ श्रीगुरुभ्यो नमः॥ अमरीकबरीभारभ्रमरीमुखरीकृतम्। दूरीकरोतु दुरितं गौरीचरणपंकजं॥१॥ परस्परस्तपस्संपत्फलायितपरस्परौ॥ प्रपंचमातापितरौ प्राञ्चौ जायापती नुमः॥२॥ उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः। यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयस्स मे दिशतु शाश्वतिकं मुकुंदः॥३॥ अलंकारेषु बालानामवगाहनसिद्धये। ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः॥४॥ येषां चंद्रालोके दृश्यंते लक्ष्यलक्षणश्लोकाः। प्रायस्त एव तेषामितरेषामभिनवा विरच्यंते॥५॥

स्तुमः२

यत्रोपमानोपमेययोः हृदयहृद्ययाह्लादित्वेन चारुसादृश्यमुद्भूततयोल्लसति। व्यंग्यमर्यादां विना स्पष्टं प्रकाशते। तत्रोपमालंकारः। हंसीवेति तदुदाहरणम्॥ इयं पूर्णोपमेत्युच्यते। हंसी कीर्त्तिः स्वर्गंगावगाहनमिवशब्दश्चेत्येषां ते उपमानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णामप्युपादानात्॥ यथा वा। गुणदोषौ बुधो गृह्णन्निंदुक्ष्वेडाविवेश्वरः। शिरसा श्लाघते पूर्वं परं कंठे नियच्छति। अत्र यद्युपमानोपमेययोर्नैकः साधारणो धर्मः। उपमाने ईश्वरे चंद्रगरलयोर्ग्रहणमुपादानं तयोर्मध्ये पूर्वस्य चंद्रस्य शिरसा श्लाघनं

परिसीलनं५

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः
हंसीव [illegible] ते कीर्तिः स्वर्गंगामवगाहते

वहनं उत्तरस्य गरलस्य कंठे नियमनं स्थापनं उपमेये तु बुधे गुणदोषयोर्ग्रहणं ज्ञानं
तयोर्मध्ये पूर्वस्य गुणस्य शिरसा श्लाघनं शिरःकंपेनाभिनंदनं उत्तरस्य दोषस्य कंठे नियम
नं कंठादुपरि वाचा अनुद्घाटनमिति भेदात् तथापि चंद्रगरलयोर्गुणदोषयोश्च बिंबप्रति
बिंबभावेनाभेदात् उपादानज्ञानादीनां ग्रहणश्लिष्याघेकृतादोपादानेनाभेदाध्यवसायाद्
साधारणधर्मतेति पूर्वस्माद्विशेषः। वस्तुतो भिन्नयोरप्युपमानोपमेयधर्मयोः परस्परसादृश्या
दभिन्नयोः पृथगुपादानं बिंबप्रतिबिंबभाव इत्यालंकारिकसमयः। वर्ण्योपमानधर्माणामुप
मावाचकस्य च। एकद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमा[illegible]धा। तडिद्गौरींदुतुल्यास्या कर्पूरंती
दृशोर्मम। कांत्या स्मरवधूयंती दृष्टा तन्वीह सा मया। यत्तयामेलनं तत्र लाभो मे यश्च तद्रतेः। त
देतत्काकतालीयमवितर्कितसंभवं। उपमेयादीनां चतुर्णां मध्ये एकस्य द्वयोस्त्रयाणां वा प्र
तिपादकशब्दाभावे लुप्तोपमेत्युच्यते। सोऽष्टधा। यथा वाचकलुप्ता धर्मवाचकलुप्ता। वाचको
पमेयलुप्ता उपमानलुप्ता वाचकोपमानलुप्ता धर्मोपमानलुप्ता धर्मोपमानवाचकलु
प्ता चेति। तत्रोपमानलोपरहिताश्चत्वारो भेदाः [illegible]तडिद्गौरीत्यादिश्लोकेन प्रदर्शिताः॥
तद्वतो भेदा उत्तरश्लोकेन तत्र तडिद्गौरीत्यत्र वाचकलोपस्तडिदिव गौरी सर्वं उपमानानि

अथकर्पूरमञ्जर्याभिसमरः २

सामान्यवचनैरितिसमासविधायकंशास्त्रंकृतः। इंदुतुल्यास्येत्यत्र धर्मलोपस्यैच्छिकत्वान्नशास्त्र
कृतः। कांत्याइंदुतुल्यास्येत्यपि वक्तुंशक्यत्वात्। कर्पूरयंतीत्यत्र धर्मवाचकलोपः। कर्पूरमिव
आचरंतीत्यर्थे विहितस्यकर्पूरवदानंदात्मकाचारार्थस्यक्विपःस्वशब्देनसहलोपात्। अत्र
धर्मिलोपऐच्छिकः। नयनयोरानंदात्मकतयाकर्पूरंतीतितदुपादानस्यापिसंभवात्। कां
त्यास्मरवधूयंतीत्यत्रवाचकोपमेयलोपः। अत्रकांत्येतिविशेषणसामर्थ्यात्स्वात्मानंकामव
धूमिवाचरंतीत्यस्यार्थस्यगम्यमानतयास्वात्मनःउपमेयस्यसहोपमावाचकेनानुपादान
त्सस्यैच्छिकः। स्वात्मानंस्मरवधूयंतीत्युपमेयोपादानस्यापिसंभवात्। काकतालीयमित्यत्रका
कतालशब्दौ वृत्तिविषयेकाकतालसमवेतक्रियावर्त्तिनौ। तेनकाकगमनमिवतालपतनमि
वकाकतालमितिइवार्थेसमासाच्चतद्विषयादितिद्योतकात्समासः। उभयत्रोपमेयंस्वस्यक
श्चित् गमनंतत्रैवरहसितन्व्या अवस्थानंच। तेनस्वस्यतन्व्याश्चसमागमःकाकतालसमाग
मसदृशाइतिफलति। ततःकाकमिवकाकतालीयमितिद्वितीयस्मिन्निवार्थेसमासाच्चत
द्विषयादितिसूत्रेणइवेप्रतिकृतावित्यधिकारस्थेनछप्रत्ययः। तथाचपतनदलितंतालफलं
यथाकाकेनोपभुक्तंएवंरहोदर्शनक्षुभितहृदयातन्वीस्वेनोपभुक्तेतितदर्थः। ततश्चात्रका २

कृत्तद्धितसमासैकशेषसनाद्यंतधातुरूपाः पंचवृत्तयः। सन्क्यच्काम्यच्क्य
ङ्क्यषोथाचारक्विप्णिज्यङौतथा। यगायईयङ्णिङ्चेतिद्वादशामीस
नाद्यः॥१६

२

काकागमनतालपतनसमागमस्वरूपस्य काकरुततालफलोपभोगरूपस्य चोपमानस्यानुपा
दानात् प्रत्ययार्थोपमायामुपमानलोपः। समासार्थोपमायां वाचकोपमानलोपः। सर्वेष्वप्ययं लोप
रूपप्रत्यययोर्विधायकशास्त्रसूत्रः। अवितर्कितसंभवमिति साधारणधर्मस्यानुपादाने प्रत्ययार्थो
पमायां धर्मोपमानलोपः। समासार्थोपमायां धर्मोपमानवाचकलोप इति सूक्ष्मदृशावधातव्यं।
एतेषामुदाहरणानि विस्तरभयान्नोल्लिख्यंते। उपमानोपमेयत्वं यदेकस्यैव वस्तुनः। इंदुरिंदुरिव
श्रीमानित्यादावनन्वयः। एकस्यैव वस्तुनः उपमानोपमेयत्ववर्णनमनन्वयः। वर्ण्यमानमपि स्वस्य
साधर्म्येनान्वेतीति व्युत्पत्तेः। अनन्वयिनोऽप्यर्थस्याभिधानं सदृशांतरव्यवच्छेदेनानुपमत्वद्योतना
र्थं। इंदुरिंदुरिव श्रीमानित्युक्ते। श्रीमत्वे चंद्रस्य नान्यः सदृशोऽस्तीति सदृशांतरव्यवच्छेदो ल
भ्यते। ततश्च स्वेनापि सादृश्यासंभवादनुपमत्वपर्यवसानं। यथा वा। गगनं गगनाकारं सागरः
सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिव। पूर्वोदाहरणे श्रीमत्वस्य धर्मस्योपादानम
स्ति। इह तु गगनादिषु वैपुल्यादेर्धर्मस्य तन्नास्तीति विशेषः। पर्यायेण द्वयोस्तच्चेदुपमेयो
पमा मता। धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि। द्वयोः पर्यायेणोपमानोपमेयत्वकल्पनं तृती
यसादृश्यव्यवच्छेदार्थं। धर्मार्थयोर्हि कस्यचित् केनचित्सादृश्ये वर्णिते तस्याप्यन्येन सादृश्य
मर्थसिद्धमपि मुखतो वर्णमानं तृतीयसादृश्यव्यवच्छेदार्थं फलति। यथा वा। खमिव जलं
जलमिव खं हंस इव चंद्रश्चंद्र इव हंसः। कुमुदाकारास्तारास्ताराकाराणि कुमुदानि। पूर्वत्र

व२

पूर्णश्रीरिति धर्म उपात्तः। इह तु निर्मलत्वादिधर्मो नोपात्त इति भेदः। उदाहरणद्वयेपि प्रकृततया
पूर्वोपमानोपमेयत्वकल्पनं। साक्षिधर्मसम्बन्धः शारदि गगनसलिलादिनैर्मल्यस्य वर्णनी
यत्वात्। प्रकृताप्रकृतयोरप्येषा संभवति। यथा। गिरिव गजराजोयं गजराजइवोच्चैर्विभाति
गिरिः। निर्झर इव मदधारा मदधारास्यैवो निर्झरः स्रवति। प्रतीपमुपमानस्योमेयत्वप्रकल्प प ४
नं। त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः। प्रसिद्धोपमानोपमेयत्वप्रातिलोम्यात्प्रतीपं। य
थावा। यत्त्वन्नेत्रसमानकांतिसलिले मग्नं तदिंदीवरं मेघैरंतरितः प्रिये तव मुखच्छायानुका
रीशशी। येपि त्वद्गमनानुसारि गतयस्ते राजहंसा गतास्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन सुखं
न क्षम्यते। अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत्। अलं गर्वेण ते वक्त्र कांत्या चंद्रोपि तादृशः।
अत्युत्कृष्टगुणतया वर्ण्यमानस्य स्वसादृश्यमसहमानस्योपमेयं किंचित्प्रदर्श्य तावता तस्य ति
रस्कारो द्वितीयं प्रतीपं पूर्वस्मादपि विच्छित्तिविशेषशालि। यथावा। गर्वमसंभाव्यममुं लोचन
युगलेन किं वहसि भद्रे। संति दृशानि दिशि दिशि सरस्सु ननु नीलनलिनानि। वर्ण्यो
पमेयलाभेन तथान्यस्याप्यनादरः। कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्याः संति हि स्त्रियः।
अत्युत्कृष्टगुणतया कंचिदप्युपमानभावमसहमानस्य वर्ण्यस्य वर्ण्यमुपमेयं परिकल्प्य
तावता तस्य तिरस्कारः पूर्वप्रतीपवैपरीत्येन तृतीयं प्रतीपं। यथावा। अहमेव गुरुः सुदा

रूणानामितिहालाहलमास्मतातदृप्यः। ननुसंतिभवादृशानिभूयोभुवनेस्मिन्वचननानिदुर्ज
नानां। वर्ण्येनान्यस्योपमायाअनिष्पत्तिवचश्चतत्। सुधापवादोमुग्धाक्षित्वन्मुखाभंकिलांबुजं।
अवर्ण्यवर्ण्योपमित्यनिष्पत्तिवचनंपूर्वेभ्यउत्कर्षशालिचतुर्थंप्रतीपं। उदाहरणंसुधापवादस्त्वोत्तम्या
उपमित्यनिष्पत्तिरुद्घाटिता। यथावा। आकर्ण्यसरोजाक्षिवचनीयमिदंभुवि। शशांकस्तववक्त्रे
णपामरैरुपमीयते। प्रतीपमुपमानस्यकैमर्थ्यमपिमन्वते। दृष्टंचेद्वदनंतस्याःकिंपद्मेनकिं
मिंदुना। उपमेयस्यैवोपमानप्रयोजकधूर्वहत्वेनोपमानप्रातिलोम्यात्पंचमंप्रतीपं। यथावा। तदोजसस्त
द्यशसःस्थिताविमौवृथेतिचित्तेकुरुतेयदायदा। तनोतिभानोःपरिवेषकैतवात्तदाविधिःकुंडलनां
विधोरपि। केचिदनन्वयोपमेयोपमाप्रतीपानामुपमाविशेषत्वेनतदंर्भावंमन्यंते। अन्येतुपंचमंप्रतीपप्र
कारमुपमानाक्षेपरूपत्वादाक्षेपालंकारमाहुः। विषय्यभेदताद्रूप्यरंजनंविषयस्ययत्। रूपकंतुत्रिधाधि
क्यन्यूनत्वानुभयोक्तिभिः। अयंहिधूर्जटिःसाक्षाद्येनदग्धाःपुरःक्षणात्। अयमास्तेविनाशंभु
तार्तीयीकंविलोचनं। शंभुर्विश्वमवत्यद्यस्वीकृत्यसमदृष्टितां। अस्यामुखेंदुनालब्धेनेत्रानंदेकि
मिंदुना। साध्वीयमपरालक्ष्मीरसुधासागरोदिता। अयंकलंकिनश्चंद्रान्मुखचंद्रोतिरिच्यते। वि
षयिउपमानभूतंपद्मादिविषयस्तूपमेयंवर्णनीयंमुखादि। विषयिणोऽभेदेनरूपेणविषयस्यरंज
नंरूपकं। अन्यरूपेणरूपवतःकारणात्। तच्चक्वचित्सिद्धविषय्यभेदपर्यवसितंक्वचिद्भेदेप्र

तीयमानएवतदीयधर्मारोपमात्रपर्यवसितं। ततश्चरूपकंतावद्द्विविधं। अभेदरूपकंताद्रूप्यरूपक
मिति। द्विविधमपिप्रत्येकंत्रिविधं। प्रसिद्धविषय्याधिक्यवर्णनेनतन्न्यूनत्ववर्णनेनानुभयोक्त्या
च। एवंरूपकंषड्विधं। अयंहिलीलादिसार्धश्लोकेनाभेदरूपकाणि। अस्यामुखेंदुनेत्यादिसार्धश्लो
केनताद्रूप्यरूपकाणिचाधिक्यन्यूनत्वानुभयोक्तिभिरुदाहरणक्रमप्रातिलोम्येनोदाहृतानि। येनद
ग्धाइतिविशेषणेनवर्णनीयराज्ञिप्रसिद्धशिवाभेदानुरंजनाच्छिवस्यपूर्वावस्थातोवर्णनीयरा
जभावावस्थायांन्यूनत्वाधिक्ययोरवर्णनीयाच्चानुभयाभेदरूपकमाद्यं। तृतीयलोचनप्रहा
णोक्त्यापूर्वावस्थातोन्यूनताधिक्यप्रदर्शनात्। न्यूनाभेदरूपकंद्वितीयं। न्यूनत्ववर्णनमप्यभेददार्ढ्या
पादकत्वाच्चमत्कारकारि। विषमदृष्टित्वपरित्यागेनजगद्रक्षकत्वोक्त्याशिवस्यपूर्वावस्थातोवर्ण
नीयराजभावावस्थायामुत्कर्षविभावनादधिकाभेदरूपकंतृतीयं। एवमुत्तरोत्तरताद्रूप्यरूपको
दाहरणेष्वपिक्रमेणानुभयन्यूनाधिकभावाउन्नेयाः। अनेनैवक्रमेणोदाहरणांतराणि। चंद्रज्यो
त्स्नाविशदपुलिनेसैकतेस्मिन्सरय्वावादद्यूतंचिरतरमभूत्सिद्धयूनोःकयोश्चित्। एकोवक्तिप्र
थमनिहतंकैटभंकंसमन्यस्त्वंसत्वंकथयभवताकोहतस्तत्रपूर्वम्॥ अत्रसत्वमित्यनेनकं
सकैटभयोर्हंतायोगरूढःध्वजस्तत्तादात्म्यंवर्णनीयस्यराज्ञःप्रतिपाद्यतंप्रतीतकंसकैटभवध

द्रूधा २

योःपौर्वापर्यप्रश्नव्याजेन तत्तादात्म्यदृढीकरणात्पूर्वावस्थात उत्कर्षापकर्षयोरविभावनाच्चानुभया
भेदरूपकं। वेधाँभ्रमंचक्रे कांतासु कनकेषु च। तासु तेष्वप्यनासक्तः साक्षाद्भर्गो नराकृतिः।
अत्र साक्षादिति विशेषणेन विरक्तस्य प्रसिद्धशिवतादात्म्यमुपदिश्य नराकृतिरिति तदप्यनु
त्तिविकल्पप्रतिपादनान्न्यूनाभेदरूपकं। अप्यागते किमिति वेपत एष सिंधुस्त्वं सेतुमंथकृतः कि
मसौ बिभर्ति। द्वीपांतरेपि निहिते स्ववशं वदान्यात्वां राजपुंगव निषेवत एव लक्ष्मीः। अत्र त्वं सेतुमं
थकृदिति सेतोरमृतमंथनस्य च कर्त्रा पुरुषोत्तमेन वर्णनीयस्य तादात्म्यमुक्तं तथापि त्वदागम
नं सेतुबंधनाय मंथनाय वेति समुद्रेण न भेतव्यं। द्वीपांतराणामपि त्वद्वशंगतत्वेन पूर्ववद्द्वीपांतर
जेतव्याभावात्। प्राप्तलक्ष्मीकत्वेन मंथनप्रसक्त्यभावाच्चेति पूर्वावस्थात उत्कर्षविभावनादधिका
भेदरूपकम्। किं पद्मस्य रुचिं न हंति नयानंदं विधत्ते न किं वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किं।
वक्त्रेंदो तव सत्यपं यदपरः शीतांशुरुज्जृंभते दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिंबाधरे। अत्रा
परः शीतांशुरित्यनेन वक्त्रेंदोः प्रसिद्धचंद्राभेदमाविष्कृत्य तस्य प्रसिद्धचंद्रकार्यकारित्वमात्र
प्रतिपादनेनोत्कर्षापकर्षयोरदर्शनात् अनुभयरूपताद्रूप्यरूपकं। अचतुर्वदनो ब्रह्मा द्विबाहुरप
रो हरिः। अभाललोचनः शंभुर्भगवान्बादरायणः। अत्र ब्रह्मादावपर इति विशेषणाद्विष
पिताद्रूप्यविवक्षाविभावना। चतुर्वदनत्वादिवैकल्यं चोक्तमिति न्यूनताद्रूप्यरूपकं। इदंवि

शेषोप्युदाहरणमिति वामनमतं। यदाह। एकगुणहानौ गुणसाम्ये दार्ढ्यं विशेषोक्तिरिति। किमसुभिर्ग्लपितैर्जडमन्यसे मयि निमज्जतु भीमसुतामनः। मम किल श्रुतिमाह तदर्थिकां नलमुखेंदुपरां विबुधस्मरः। अत्र दमयंतीकृतोपालंभे प्रसिद्धचंद्रोन्निर्याणकालिकमनःप्रवेशश्रुतितात्पर्यविषयः किंतु नलमुखचंद्र एवेति। ततोस्याधिक्यप्रतिपादनादधिकताद्रूप्यरूपकं। रूपकस्य सावयवनिरवयवत्वादिभेदप्रपंचनं तु चित्रमीमांसायां द्रष्टव्यं। परिणामः क्रियार्थश्चेद्विषयी विषयात्मना। प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा। यत्रारोप्यमाणो विषयी किंचित्कार्योपयोगित्वेन निबध्यमानः स्वतस्तस्य तदुपयोगित्वासंभवात्प्रकृतात्मतापत्तिमपेक्षते। तत्र परिणामालंकारः। तत्रोदाहरणं प्रसन्नेनेति। अत्राब्जस्य वीक्षणोपयोगित्वं निबध्यते न तु दृशः। मयूरव्यंसकादिसमासे नोत्तरपदार्थप्राधान्यात्। न चोपमितसमासः सामान्याप्रयोग इति तदप्रयोग एवोपमितसमासानुशासनात्। अब्जस्य वीक्षणोपयोगित्वेन स्वात्मना संभवतीति तस्य प्रकृतदृगात्मतापरिणामापेक्षणात्परिणामालंकारः। यथा वा। तीर्त्वा भूतेशमौलिस्रजममरधुनीमात्मनासौ तृतीयस्तस्मै सौमित्रिमैत्रीमयमुपकृतवानातरं नाविकाय। ग्रामग्राह्यस्तनीभिः शबरयुवतिभिः कौतुकोदंचदक्षं कृच्छ्रादन्वीयमानस्त्वरितमथ गिरिं चित्रकूटं प्रतस्थे। अत्रारोप्यमाण आतरः सौमित्रिमैत्रिरूपतापत्त्या गुहोपकारलक्षणकार्योपयोगी स्वात्मना। गुहस्य रघुनाथैकप्रसादापेक्षित्वेन वेतनार्थि

साश्रुनेत्रोत्पलाभिः। ७

र्वपदार्थप्रधानोव्ययीभावः। उत्तरप्रधानस्तत्पुरुषः। उभ
नोद्वंद्वः। अन्यपदार्थप्रधानोबहुव्रीहिः।

लाभ्यवादितिपरणामः। बहुभिर्बहुधोल्लेखादेकस्योल्लेखइष्यते। स्त्रीभिःकामोऽर्थिभिःस्वर्द्रुःका
लःशत्रुभिरैक्षिसः। यत्रनानाविधधर्मयोग्यमेकंवस्तुतत्तद्धर्मयोगरूपनिमित्तभेदादनेकेन
ग्रहीत्राऽनेकधोल्लिख्यतेतत्रोल्लेखः। अनेकधोल्लेखनेरुच्यर्थित्वभयादिकंयथार्हंप्रयोजकं।
रूचिरभिरीतिःअर्थित्वंलिप्सा। स्त्रीभिरित्याद्युदाहरणं। अत्रैकएवराजासौंदर्यवितरणप
राक्रमशालीतिस्त्रीभिरर्थिभिःप्रत्यर्थिभिश्चरुच्यर्थित्वभयैःकामकल्पतरुकालरूपोदृष्टः।
यथावा। जगत्रातेतिवृद्धाभिःश्रीकांतइतियौवतैः। यथास्थितश्चबालाभिर्दृष्टःशौरिःस
कौतुकं। यस्तथाभीतंभक्तंगजंत्वरयात्रायतेस्मसोयमादिपुरुषइतिवृद्धाभिःसंसारस्मी
त्यातद्भयार्थिनीभिःकृष्णोयंमथुरापुरंप्रविशन्दृष्टः। यस्तथाचांचल्येनप्रसिद्धायायाःश्र
योपिकामाचारवैदग्ध्येननित्यंवल्लभःसोयंदिव्ययुवतियुवतिसमूहैःसोत्कंठंदृष्टः। बाला
भिस्तुबाल्यगतरूपवेषालंकारादिदर्शनमात्रलालसाभिर्यथावस्थितवेषादियुक्तोदृष्ट
इतिबहुधोल्लेखः। पूर्वःकामत्वारोद्यांपरूपकसंकीर्णः। अयंतुशुद्धइतिभेदः। एकेनब
हुधोल्लेखेप्यसौविषयभेदतः। गुरुर्वचस्यर्जुनोयंकीर्त्तौभीष्मःशरासने। ग्रहीतृभेदा
भावेपिविषयभेदाद्बहुधोल्लेखनादसावुल्लेखः। उदाहरणंश्लेषसंकीर्णंवचोविषयेमल

ष्पदुरिति वक्तृहस्यापि तिरिसाद्यर्थांतरस्यापि क्रोडीकृतत्वात्। शुद्धो यथा। अतुङ्गं कुचयोः सूक्ष्मं वि
लग्ने विपुलं च सुषि विस्तृतं नितंबे। अधरे रुणमा विस्तुरे चित्ते करुणाद्रालिकपालि भागधे
यं। स्यात्स्मृतिभ्रांतिसंदेहैस्तदंकालंकृतित्रयं। पंकजं पश्यतः कांतामुखं मे गाहते मनः। अ
यं प्रमत्तो मधुपस्त्वन्मुखं वेत्ति पंकजं। पंकजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः। स्मृतिभ्रांतिसंदेहैः
सादृश्यान्निबध्यमानैः स्मृतिमान् भ्रांतिमान् संदेह इति स्मृत्यादिपदांकितमलंकारत्रयं भवति।
तच्च क्रमेणोदाहृतं। यथा वा। दिव्यानामपि कृतविस्मयां पुरस्तादंभस्तः स्फुरदरविंदचारुहस्तां।
उद्वीक्ष्य श्रियमिव कांचिदुत्तरंतीमस्मार्षीज्जलनिधिमंथनस्य शौरिः। पूर्वत्र स्मृतिमदुदाह
रणे सदृशास्यैव स्मृतिः। अत्र सदृशालक्ष्मीस्मृतिपूर्वकं तत्संबंधिनो जलनिधिमंथनस्यापि
स्मृतिरिति भेदः। पलाशकुसुमभ्रांत्या शुकतुंडे पतत्यलिः। सोपि जंबूफलभ्रांत्या तमलिं धर्तु
मिच्छति। अत्रान्योन्यविषयभ्रांतिनिबंधनः पूर्वस्माद्विशेषः। जीवनग्रहणे नम्रा गृहीत्वा पुनरुत्थिताः।
किं कनिष्ठाः किमु ज्येष्ठा घटीयंत्रस्य दुर्जनाः। पूर्वोदाहरणे संदेहः प्रसिद्धकोटिकः अयंत्वसि
कोटिक इति भेदः। शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः। नायं सुधांशुः किं तर्हि व्योमगंगा
सरोरुहं। वर्णनीयवस्तुनि तत्सदृशधर्मारोपफलकस्तदीयधर्मनिह्नवः कविमतिविकासात्रि
क्षेत धर्मांतरस्यापि वा निह्नवः शुद्धापह्नुतिः। यथा चंद्रे द्युनदीपुंडरीकत्वारोपफलको

स्तदीयधर्मस्तस्य चंद्रत्वस्यापन्हवः। यथावा। अंकं केपि शशंकिरे जलनिधेः पंकं परे मेनिरे सारं
गं कतिचिच्च संजगदिरे भूच्छायमैच्छन्परे। इंदौ यद्दलितेंद्रनीलशकलश्यामं दरीदृश्यते त
त्सांद्रं निशि पीतमंधतमसं कुक्षिस्थमाचक्ष्महे। अत्रोत्प्रेक्ष्य धर्माणामपन्हवः परपक्षत्वोपन्यासा
दर्थसिद्धः। स एव सयुक्तिपूर्वश्चेदुच्यते हेत्वपन्हुतिः। नेंदुस्तीव्रो न निश्यर्कः सिंधोरौर्वोयमुत्थि
तः। अत्र चंद्र एव तीव्रत्वे नैशिकत्वयुक्तिभ्यां चंद्रत्वसूर्यत्वापन्हवो वडवानलत्वारोपार्थः। यथावा॥
मंथानभूमिधरमूलशिलासहस्रसंघट्टनव्रणकिणः स्फुरतींदुमध्ये। छायामृगः शशक इत्यतिपा
मरोक्तिस्तेषां कथंचिदपि तत्र हि न प्रसक्तिः। अत्र चंद्रमध्ये मंथनकालिकमंदरशिलासंघट्टनव्र
णकिणस्यैव छायादीनां संभवो नास्तीति छायाद्यपन्हवः पामरवचनत्वोपन्यासेनाविष्कृतः। अन्य
त्र तस्यारोपार्थः पर्यस्तापन्हुतिस्तु सा। नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखं। यत्र कचिद्व
स्तुनि तदीयधर्मनिन्हवः अन्यत्र वर्णनीयवस्तुनि तस्य धर्मस्यारोपार्थः पर्यस्तापन्हुतिः। यथा
चंद्रे चंद्रत्वनिषेधो वर्णनीयवस्तुनि प्रेयसीमुखे तदारोपार्थः। यथावा। हालाहलो नैव विषं
विषं रमा जनाः परं व्यत्ययमत्र मन्वते। निपीय जागर्ति सुखेन तं शिवः स्मरन्निमां मुह्यति
निद्रयाहरिः। पूर्वोदाहरणे हेतूक्तिर्नास्ति। अन्यत्र तु सास्तीति भेदः। ततश्च पूर्वापन्हुतिवद
त्रापि द्वैविध्यमिति द्रष्टव्यम्। भ्रांतापन्हुतिरन्यस्य शंकायां भ्रांतिवारणे। तापं करोति सोत्कंपं

ज्वरः किं न सखि स्मरः। अत्र तापं करोतीति स्मरवृत्तांते कथिते तस्य ज्वरसाधारण्याद्ज्वरबुध्या सख्या ज्वरः किमिति पृष्टे न सखि स्मर इति तत्वोक्त्या भ्रांतिवारणं कृतं। यथा वा। नागरिकः समधिकोन्नतिरिति मधुलिहः कोयमुन्नयतः पुच्छः। नहि नहि करकलभोयं भुजगोयमस्य नलुपुछं। इदं संभवद्भ्रांतिपूर्विकायां भ्रांतापन्हुतावुदाहरणं। कल्पितभ्रांतिपूर्वा यथा। जटा नेयं वेणी कृतकचकलापा न गरलं कंठे कस्तूरीयं शिरसि शशिलेखा न कुसुमं। इयं भूतिर्नांगे प्रियविरहजन्मा धवलिमा पुरारातिभ्रांत्या कुसुमशर किं मां प्रहरसि। अत्र कल्पितभ्रांतिर्जटा नेयमित्यादिनिषेधमात्रेणान्यथापूर्ववस्तुभ्रांत्यभावाद्। दंडी तत्र तत्वाख्यानोपमेत्युपमाभेदं मेने। यदाह। न पद्मं मुखमेवेदं न भृंगौ चक्षुषी इमे। इति विस्पष्टसादृश्यात्तत्वाख्यानोपमा मतेति।

छेकापन्हुतिरन्यस्य शंकातस्तथ्यनिन्हवे। प्रजल्पन्मत्पदे लग्नः कांतः किं नहि नूपुरः॥

कस्यचित्प्रति रहस्योक्तावन्येन श्रुतायामुक्तेस्तात्पर्यवर्णनेन तस्या निन्हवे छेकापन्हुतिः॥ यथा। नायिकया नर्मसखीं प्रति प्रजल्पन्मत्पदे लग्न इति स्वनायकवृत्तांते निवेद्यमाने तदाकर्ण्य कांतः किमिति शंकितवतीमन्यां प्रति नहि नूपुर इति निन्हवः। यथा वा सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमांचं। नागरिकः किमु मिलितो नहि नहि सखि हैमनः पवनः॥

निश्चुम्य२

इदमर्थयोजनयातथ्यनिह्नवेउदाहरणं। शब्दयोजनयायथा। प्रह्वेल्यन्नयनेस्मरामिसततंभावो
भवत्कुंतलेनीलेमुह्यतिकिंकरोमिमहितैःक्रीतोस्मितेविभ्रमैः। इत्युत्सुचन्प्रवचोभिभाषणारु
षानिर्भर्त्सितोराधयाव्ल्हस्तत्सरमेवतद्यपदिशन्क्रोजबिटःपातुवः। सर्वमिदंविषयांतरयोज
नेउदाहरणं। विषयैक्यस्यअवस्थाभेदेनयोजने। यथावदंतीजारवृत्तांतंपत्यौधूर्त्तासखीधिया।।
पतिंबुध्वासखिततःप्रबुद्धास्मीत्यपूरयत्। कैतवापन्हुतिर्व्यक्तौव्याजाद्यैर्निन्हुतेःपदैः। निर्या
तिस्मरनाराचाःकांतादृक्पातकैतवात्। अत्रासत्यत्वाभिधायिनाकैतवपदेननेमेकांताकटा
क्षाःकिंतुस्मरनाराचाःइत्यपन्हवःप्रतीयते। यथावा। रिक्तेषुवारिकथयाविपिनादरेषुमध्या
न्हजंभितमहातपतापतप्ताः। स्कंधांतरोहितदवाग्निशिखाछलेनजिह्वांप्रसार्यतरवोजल
मर्थयंते। संभावनास्यादुत्प्रेक्षावस्तुहेतुफलात्मना। उक्तानुक्तास्पदाद्यात्रसिद्धासिद्धास्प
दपरे। धूमस्तोमंतमःशंकेकोकीविरहशुष्मणां। लिंपतीवतमोंगानिवर्षतीवांजनंनभः।
रक्तौतवौघ्रियुगलंभुविविक्षेपणात्पुरं। त्वन्मुखाभेच्छयानूनंपद्मैवैरायतेशशी। मध्यःकिं
कुचयोर्धृत्यैबद्धःकनकदामभिः। प्रायोअंतर्वसदैनैक्यंप्राप्तुंतोयेनपश्यति। अन्यधर्मसंबंध
निमित्तेनान्यस्यअन्यतादात्म्यसंभावनंउत्प्रेक्षा। सावस्तुहेतुफलात्मगोचरत्वेनत्रिविधा।
तत्रवस्तुनःकस्यचिद्वस्त्वंतरतादात्म्यसंभावनोत्स्वरूपोत्प्रेक्षोच्यते। अहेतोर्हेतुभावनाफल

स्य फलात्मत्वेन चेत्प्रेक्षाफलोत्प्रेक्षेत्युच्येते। अत्राद्यास्वरूपोत्प्रेक्षा उक्तविषयानुक्तविषया चेति द्वि
८ विधा। परे हेतुफलोत्प्रेक्षे सिद्धविषयासिद्धविषये चेति प्रत्येकं द्विविधे। एवं षण्णामु
त्प्रेक्षाणां धूमस्तोमस्येत्यादिना क्रमेणोदाहरणानि। रजनी सर्वत्र विसृत्वरे तमसो नेत्रदृ
ष्टिप्रतिरोधकत्वादिधर्मसंबंधेन गम्यमानेन निमित्तेन सद्यःप्रियविघटितसर्वदेशस्थि
तकोकांगनाहृदुपगतप्रज्वलिष्यद्विरहानलधूमस्तोमतादात्म्यसंभावनास्वरूपोत्प्रेक्षा। त
मसो विषयोपादानादुक्तविषया। तमोव्यापनस्य नभःप्रभृति भूपर्यंतसकलवस्तुसांद्रम
लिनीकरणेन निमित्तेन तमःकर्तृकलेपनतादात्म्योत्प्रेक्षा। नभःकर्तृकांजनवर्षणतादा
त्म्योत्प्रेक्षा चानुक्तविषया स्वरूपोत्प्रेक्षा। उभयत्रापि विषयभूतस्य तमोव्यापनस्यानुपादाना
त्। नन्वत्र तमसो व्यापनेन निमित्तेन लेपनकर्तृतादात्म्योत्प्रेक्षा। तमसो भूपर्यंतं गाढनी
लिमव्याप्तत्वेन निमित्तेनांजनवर्षणकर्तृतादात्म्योत्प्रेक्षा चेति उत्प्रेक्षाद्वयमुक्तविषय
मेवास्तु मैवं। लिंपति वर्षतीत्याख्यातयोः कर्तृवाचकत्वेपि भावप्रधानमाख्यातमिति ८
स्मृते धात्वर्थक्रियायाः प्राधान्येन तदुपसर्जनत्वेन। न्वितस्य कर्तुरुत्प्रेक्षणीयतया

१ संभवा न्यत्रान्वयात्। अत एवाख्यातार्थस्य कर्तुः क्रियोपसर्जनत्वेनान्यत्रान्वयासंभवादेव हेतोस्त
स्योपमायामुपमानतयान्वयोपिदंडिनानिराकृतः। कर्त्ता यद्युपमानं स्यान्न्यग्भूतोसौ क्रि
यापदे। स्वक्रियया साधनव्यग्रो नालमन्यदपेक्षितुमिति। केचित्तु। तमोनभसोर्विषयिण्योस्तत्क
र्तृके लेपनवर्षणे स्वरूपे धर्मावुत्प्रेक्ष्येते इत्याहुः। तन्मते स्वरूपोत्प्रेक्षायां धर्म्युत्प्रेक्षा धर्मोत्प्रे
क्षा चेत्येवं द्वैविध्यं द्रष्टव्यं। चरणयोः स्वतःसिद्धरक्तिमनि वस्तुतो विक्षेपणं न हेतुरिति।
अतो हेतोरस्य हेतुत्वेन संभावना हेतूत्प्रेक्षा। विक्षेपणस्य विषयत्वा सिद्धविषया। चंद्रपद्मवि
रोधे स्वाभाविकेनापि कावदनकांतिप्रेक्षा न हेतुरिति तत्र तद्धेतुसंभावना हेतूत्प्रेक्षा। वस्तुत
स्तद्दिदृक्षाया अभावादसिद्धविषया। मध्यः स्वयमेव कुचौ धरतीति नक्केनकदामबन्धेनाध्य
वसिताया वलिचयरशालिताया बलादिति मध्यकर्तृककुचधृतेस्तत्फलत्वेनोत्प्रेक्षासि
द्धविषया फलोत्प्रेक्षा। जलजस्य जलनिजावस्थितेरुद्वासतपस्त्वेनाध्यवसितायाः
का। मुनीचरणसायुज्यप्राप्तिर्न फलमिति भिन्नस्यागगनकुसुमायमानायास्तपःफल
त्वेनोत्प्रेक्षणं। असिद्धविषया फलोत्प्रेक्षा। अनेनैव क्रमेणोदाहरणांतराणि। बालेंदुव
क्राण्यविकाशभावात् बभुः पलाशान्यतिलोहितानि। सद्यो वसंतेन समागतानां
नखक्षतानीव वनस्थलीनां। अत्र पलाशमुकुलानां वक्रत्वलोहित्यसंबंधेन नि

मिषेन वसंतनायकसमागतवनस्थलीसंबंधिसमयः कृतनरवक्षततादात्म्यसंभावनोत्कविषया स्वरूपोत्प्रेक्षा। पूर्वोदाहृते निमित्तभूतधर्मसंबंधो गम्यः। इह तूपात्त इति भेदः। नन्विवशब्दस्य सादृश्यपरत्वेन प्रसिद्धत्वादुपमैवास्तु। किंप तिवल्लुशासनेन लेपनकर्तुरुपमानताहिस्य क्रियोपसर्जनत्ववदिह नरवक्षतानामन्योपसर्जनत्वस्योपमाबाधकस्याभावात्। उच्यते। उपमायां यत्र क्वचित्तु स्थितैरपि नरवक्षतैः सह वक्तुं शक्यतया वसंतनायकसमागतवनस्थलीसंबंधित्वस्य विशेषणस्यानपेक्षितत्वादितदुपादानं पलाशमुकुलानां नरवक्षततादात्म्यसंभावनायामिवशब्दमवस्थापयतीति। तथात्व एव तद्विशेषणसाफल्यात्। अस्ति च संभावनायामपीवशब्दः दूरे तिष्ठन् देवदत्त इव भातीति। पिनष्टीव तरंगाग्रैः समुद्रः फेनचंदनं। तदादाय करैरिंदुर्लिंपतीव दिगंगनाः। अत्र तरंगाग्रैः फेनचंदनस्य प्रेरणं पेषणत्वेनोत्प्रेक्ष्यते। समुद्रादुत्थितस्य चंद्रस्य प्रथमं समुद्रदूरे प्रसृतानां कराणां दिक्षु व्यापनं च समुद्रोपात्तफेनचंदनकृततल्लेपत्वेनोत्प्रेक्ष्यते। उभयोरपि यत्र क्रमेण समुद्रस्प्रातागातफेनचंदनपुंजीभवनं दिशां धवलीकरणं च निमित्तमिति फेनचंदनप्रेरणकिरणव्यापनयोर्विषययोरनुपादानात्

अनुक्तविषये स्वरूपोत्प्रेक्षेति । येषां तूपात्तयोः समुद्र-चंद्रयोरिव तत्कर्तृकोपेषणलोपनरूपधर्मोत्प्रे
क्षेति मतं । तेषां मते पूर्वोदाहरणे धर्मिणो धर्म्यंतरतादात्म्योत्प्रेक्षा । इत्थं तु धर्मिणि धर्मसंसर्गो
त्प्रेक्षा । इति भेदोवगंतव्यः । रात्रौ रवेर्दिवा चेंदोरभावादिव स [illegible] प्रभुः [illegible] यत्रासौ सृष्टवानूस
ततोदिति । रात्रौ रवेर्दिवा चेंदोरभावः सन्नपि प्रतापयशःसर्गे न हेतुरिति । तस्य तद्धेतुत्व संभा
वना । सिद्धविषया हेतूत्प्रेक्षा । विवस्वतानायिषतेव मिश्राः स्वगोसहस्रेण समंजनानां । गावो
पि नेत्रापरनामधेयास्तेनेदमांध्यं खलु नांधकारः ॥ अत्र विवस्वता कृतं स्वैः किरणैः सैंजनलो
चना॥नां नयनमसदेव रात्रावांध्यं प्रतिहेतुत्वेनोत्प्रेक्षेरति । असिद्धविषया हेतूत्प्रेक्षा । पूर्वं वि
धुर्वर्द्धयितुं पयोधेः शंकेयमेणांकमणिः कियंति । पयांसि दोग्धि प्रियविप्रयोगे सशोककोकी
नयने कियंति ॥ अत्र चंद्रेण कृतं समुद्रस्य बृंहणं सदेव तेन कृतस्य चंद्रकांतद्रावणस्य कोकां
गनाबाष्पस्रावणस्य च फलत्वेनोत्प्रेक्षा इति सिद्धविषया फलोत्प्रेक्षा । रथस्थितानां परिवर्त्तना
य पुरातनानामिव वाहनानां । उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्यां । अत्रो
त्तरायणस्याश्वपरिवर्त्तनमसदेव फलत्वेनोत्प्रेक्ष्यत इत्यसिद्धविषया फलोत्प्रेक्षा । मन्ये शंके
ध्रुवं प्रायो नूनमित्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोपि तादृशः ॥ उत्प्रेक्षा सर्वकाले

भो
तापं

ह

१०

न परिगणितानां शब्दानामप्रयोगमभ्युपेक्ष्य। यथा लक्ष्मीकीर्तिर्भ्रमलग्नांताविवेशास्वर्गनिम्न
गां। रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः। पश्यनीलोत्पलद्वंद्वान्निःसरंति शिताः
शराः। विषयस्य स्वशब्देनोल्लेखनं विनापि विषयिवाचकेनैव शब्देन ग्रहणं विषयनिगरणं।
तत्पूर्वकं विषयस्य विषयिरूपतयाध्यवसानमहार्यनिश्चयः। तस्मिन्सति रूपकातिशयोक्तिः।
यथा। नीलोत्पलशरशब्दाभ्यां लोचनयोः कटाक्षाणां च निगरणपूर्वकं तद्रूपताध्यवसानं।
यथा वा। वापीकापि स्फुरति गगने तत्परं सूक्ष्मपद्मैघां सोपानालीमधिगतवती कांचनीमैं
द्रनीली। अग्रे शैलौ सुकृतिसुगमौ चंदनच्छन्नदेशौ तत्रत्यानां सुलभममृतं सन्निधानात्सु
धांशोः। अत्र वाप्यादिशब्दैर्नीलिमप्रभृतयो निगीर्णाः। अत्रातिशयोक्तौ रूपकविशेषणं रूप
कदर्शितानां विधानामिहापि संभवोस्तीति देशेन प्रदर्शनार्थं। तेनात्राप्यभेदातिशयोक्तिस्ता
द्रूप्यातिशयोक्तिरिति द्वैविध्यं। तत्राप्याधिक्यन्यूनतानुभयत्वं चेति सर्वमनुसंधेयं। यथा वा।
समाबद्धग्रासैरुपवनचकोरैरनुसृतैः किरन्ज्योत्स्नामच्छां च नवलवलिपाकप्रणयिनीं।
उपप्राकाराग्रं प्राहिणं नयने तर्कय मनागनाकाशे कोयं गलितहरिणः शीतकिरणः। अत्र कोयं
गलितहरिणत्वस्तुत्या प्रसिद्धचंद्राद्भेदः। ततउत्कर्षश्चगम्यते। एवमन्यत्राप्यूहनीयं। यद्यप
न्हुतिगर्भत्वं सैषा सापन्हवा मता। त्वत्सूक्तिषु सुधाराजन्भ्रांताः पश्यंति तां विधौ। अत्र त्वत्स

क्तौ माधुर्यमिवामृतमित्यतिशयोक्तिः चंद्रमंडलस्थममृतं न भवतीति अपन्हुतिगर्भो। यथावा। मुक्ता
विद्रुममंतरा मधुरसः पुष्पं पदं धूर्वहं प्रालेयद्युतिमंडले खलु तयोरेकासिका नार्णवे। तच्चेदं चपि
शौचवन्मूर्द्धि न पुनः पूर्वाचलाभ्यंतरे नानीमानि विकल्पयंति तदिमे येषां न सादृक्पथे। अत्राधर
ररस एव मधुरस इत्यतिशयोक्तिः पुष्परसो न मधुरस इत्यपन्हुतिगर्भो। अलंकारसर्वस्वकृ
तास्वरूपोत्प्रेक्षायां सापन्हुतित्वमुक्तं। गतासु तीरं तिमिघट्टनेन ससंभ्रमं पौरविलासिनीषु॥
यत्रोल्लसत्फेनततिच्छलेन मुक्ताट्टहासेव विभाति शिप्रा। तत स्त्रिया न च भेदः। यत्तत्र मुख्याप
न्हुतिगर्भत्वं। यत्र फेनततित्वं अपन्हुतं तत्रैवाट्टहासत्वोत्प्रेक्षणादिह तु पर्यस्तापन्हुतिगर्भत्वं
इंदुमंडलादावपन्हुतस्यामृतादेः स्तूच्यादिषु निवेशनात्। इदं च पर्यस्तापन्हुतिगर्भत्वमुत्प्रे
क्षणायामपि संभवति। तत्र स्वरूपोत्प्रेक्षायां। यथा। जानेतिरागादिदमेव बिंबं बिंबस्य च
व्यक्तमितोधरत्वं॥ द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमो भ्रमोभूदनया जनानां। अत्र प्र
सिद्धफले बिंबतामपन्हुत्यातिरागेण निमित्तेन दमयंत्यधरे तदुत्प्रेक्षा पर्यस्तापन्हुतिग
र्भा। हेतूत्प्रेक्षायास्तु भर्मत्वं प्राकुलिखिते हेतूत्प्रेक्षोदाहरणे एव दृश्यत। तत्र चांधकारे धांध्य
हेतुत्वं। अपन्हुत्यान्यत्र निवेशितं फलोत्प्रेक्षायां। यथा। रवितप्तो गजः पद्मान्नत मृणालान्बा। धितुं
ध्रुवं। सरो विशति न स्नातुं गजस्नानं हि निष्फलं। अत्र गजस्य सरःप्रवेशं प्रति फलेस्नान

फलत्वंअपन्हुसापभवाधनेतन्निवेङ्गीतं। अलमनयाप्रसक्तानुप्रसक्त्याप्रकृतमनुसरामः। भे
दातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनं। अन्यदेवास्य गांभीर्यमन्यद्धैर्यं महीपतेः। अत्र लोकप्रसि
द्धगांभीर्याद्यभेदेपिभेदो वर्णितः। यथा वा। अन्येयं रूपरूपसंपत्तिरन्या वैदग्ध्यधोरणी। नैषा
नलिनपत्राक्षी सृष्टिः साधारणी विधेः। संबंधातिशयोक्तिः स्यादयोगे योगकल्पनं। सौ
धाग्राणि पुरस्यास्य स्पृशंति विधुमंडलं। यथा वा। कतिपयदिवसैः क्षयं प्रयायात्कनकगि
रिः कृतवासरावसानः। इति मुदमुपयाति चक्रवाकी वितरणशालिनि वीररुद्रदेवे। अत्र
चक्रवाक्याः सूर्यास्तमयकारकामलास्तु मेरुक्षयस्य भावनाप्रयुक्तसंतोषासंबंधेपि तत्सं
बंधो वर्णितः। योगेप्ययोगः संबंधातिशयोक्तिरितीर्यते। त्वयि दातरि राजेंद्र स्वर्द्रुमान्नाद्रि
यामहे। अत्र स्वर्द्रुमेष्वाहरसंबंधेपि तदसंबंधो वर्णितः। यथा वा। अनयोरनवद्यांगि स्तनयो
र्जृंभमाणयोः। अवकाशो न पर्याप्तस्तव बाहुलतांतरे। अक्रमातिशयोक्तिः स्यात्सहत्वे
हेतुकार्ययोः। आलिंगंति समं देव ज्यां शराश्च पराश्च ते। अत्र यदा मौर्वीशरसंधानं तदानी
मेव शात्रवः क्षितौ पततीति हेतुकार्ययोः सहत्वं वर्णितं। यथा वा। मुंचति मुंचति काशं भजंति
च भजंति प्रकंपमरिवर्गः। हम्मीरवीरखड्गे त्यजति त्यजति क्ष्मामाशु। अत्र खड्गस्य को

शास्यसागादिकालएवपरिपूर्णांधनगृहस्थागादिवर्णितः। चपलातिशयोक्तिस्तुकार्येहेतुप्रस
क्तिजे। यास्यामीत्युदितेतन्व्यावलयोभवदूर्मिका। अत्रनायकप्रवासप्रसक्तिमात्रेणयोषि
तोतिकार्श्यंकार्यमुखेनदर्शितं। यथावा। आदातुंसकृदीक्षितेपिकुसुमेहस्ताग्रमालोहितं
लाक्षारंजनवर्त्तयापिसहसारक्तंतलंपादयोः। अंगानामनुलेपनस्मरणमप्यत्यंतखेदाव
हंहंताधीरदृशःकिमन्यदलकामोदोपिभारायते। यथावा। यास्मिन्यात्रींधिवेवदतिपुरस्तात्ति
क्ष्णेनतन्वंग्याः। गलितानिपुरोवलयान्यपराण्यपितथैवदलितानि। अत्यंतातिशयोक्ति
स्तुपौर्वापर्यव्यतिक्रमे। अग्रेमानोगतःपश्चादनुनीताप्रियेणसा। यथावा। कवींद्राणामास
न्प्रथमतरमेवांगणभुवश्चलद्भृंगासंगाःकुलकरिमदामोदमधुराः। अमीपश्चात्तेषामुपरिपति
ताःरुद्रनृपतेःकटाक्षाःक्षीरोदप्रसरदुरुवीचीसहचराः। एतास्तिस्रोप्यतिशयोक्तयःकार्य
शैघ्र्यप्रत्यायनार्थाः। वर्ण्यानामितरेषांवाधर्मैक्यंतुल्ययोगिता। संकुचंतिसरोजानिस्वै
रिणीवदनानिच। त्वदंगमार्दवेदृष्टेकस्यचित्तेनभासते। मालतीशशभृल्लेखाकदलीनांक
ठोरता। प्रस्तुतानामप्रस्तुतानांवागुणक्रियारूपैकधर्मान्वयस्तुल्ययोगिता। संकुचंती
तिप्रस्तुततुल्ययोगितायामुदाहरणं। तत्रप्रस्तुतचंद्रोदयकालीनतयावर्णनीयानांस
रोजानांप्रकाशभीतस्वैरिणीनांवदनानांचसंकोचरूपैकक्रियान्वयाद्दर्शितं४। उत्तरना

१२

उत्तरश्लोके नायिकासौकुमार्यवर्णने प्रस्तुते अवर्णनीयानां मालत्यादीनां कठोरतारूपैकगुणा
न्वयः। यथा वा। संजातपत्रक[illegible]रान्वितानि समुद्वहंति स्फुटपाटलत्वं। विकस्वराण्यर्ककराभि
मर्शाद्दिनानि पद्मानि च वृद्धिमीयुः। नागेंद्रहस्तास्त्वचि कर्कशत्वादेकांतशैत्यात्कदलीविशेषाः।
लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः। अत्र ग्रीष्मवर्णने तदीयत्वेन प्रस्तुता
नां दिनानां पद्मानां च एकक्रियान्वयः। ऊरुवर्णने प्रस्तुतानां करिकराणां कदलीनां चैकगुणान्वयः।
हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता। प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया। अत्र हिताहि
तयोर्मित्रशात्रवयोरुत्कृष्टभूतिदानस्य पराभवस्य च श्लेषेणाभेदाध्यवसायाद्वृत्तितौल्यं।
यथा वा। यश्च निंबं परशुना यश्चैनं मधुसर्पिषा। यश्चैनं गंधमाल्याद्यैः सर्वस्य कटुरेव सः। अत्र
च्छ्यति सिंचत्यर्चतीत्यध्याहारे वाक्यानि पूरणीयानि। पूर्वोदाहरणं स्तुतिपर्यवसायि। इदं निंदापर्य
वसायीति भेदः। स्वःसरस्वतीकंठाभरणोक्ता तुल्ययोगिता गुणोत्कृष्टैः समीकृत्य वचोऽन्या तु
ल्ययोगिता। लोकपालो यमः पाशी श्रीदः शक्रो भवा[illegible]निति। अत्र वर्णनीयो राजा शक्रादिभिर्लो
कपालत्वेन समीकृतः। यथा वा। संगतानि मृगाक्षीणां तडिद्विलसितान्यपि। क्षणद्वयं न तिष्ठं
ति घनारब्धान्यपि स्वयम्। सर्वत्र स्तुतिरिह निंदा। इयं काव्यादर्शे दर्शिता। इमां तुल्ययोगितां
सिद्धिरिति केचिद्व्याजह्रुः। यदाह जयदेवः। सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यताकृते।

छ्यति
सिंचति

अर्चति

सुधामेवेहविख्यातौ खंबैलैर्जल्लीद्रुजेलैरिति। मतांतरे त्वत्र वक्ष्यमाणं दीपकमेव। वदंति वर्ण्याव
र्ण्यानां धर्मैक्यं दीपकं बुधाः। मदेन भाति कलभः प्रतापेन महीपतिः। प्रस्तुताप्रस्तुतानामेकध
र्मान्वयो दीपकं यथा। कलभनरपालयोः प्रस्तुताप्रस्तुतयोरेकधर्मान्वययोर्भानक्रियान्वयः।
यथा वा। मणिः शाणोल्लीढः समरविजयी हेतिदलितो मदक्षीणो नागः शरदि सरितः श्यान
पुलिनाः। कलाशेषश्चंद्रः सुरतमृदिता बालवनिता तनिम्ना शोभंते गलितविभवाश्चार्थिषु
नृपाः। अत्र प्रस्तुतानां नृपाणां अप्रस्तुतानां मण्यादीनां शोभन्येकधर्मान्वयः प्रस्तुतैकनिष्ठः
समानो धर्मः प्रसंगादन्यत्रोपकरोति प्रासादार्थमारोपितो दीपो रथ्यायामिवेति वद्दीपसादृश्या
द्दीपकं। संज्ञायां चेतीवार्थे कन्प्रत्ययः। यद्यपि सुवर्णपुष्पां पृथिवीं चिन्वंति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुमित्यत्र प्रस्तुताप्रस्तुतानां युगपद्धर्मान्वयः। तथापि
प्रासंगित्वं केन हीयत इति प्रतिभाति। मदेन भाति कलभ इत्यत्राप्रस्तुतस्यैव प्रथमान्वयः।
प्रस्तुतोद्देशेन प्रयुक्तस्य वर्णनस्याप्रस्तुतेप्यन्वयात्। नहि दीपस्य रथ्याप्रासादयोर्युग
पदुपकारत्वेन जामात्रर्थं श्रपितस्य सूपस्यातिथिभ्यः प्रथमपरिवेषणेन च प्रासंगिकत्वं
हीयते। तुल्ययोगितायां त्वेकं प्रस्तुतमन्यदप्रस्तुतमिति विशेषाग्रहणात्सर्वोद्देशेनैव ध
र्मोक्तिरिति विशेषः। अयं चानयोरपरो विशेषः। उभयोरनयोरुपमालंकारस्य गम्य

त्वाविशेषेपि अत्राप्रस्तुतमुपमानं प्रस्तुतमुपमेयमिति व्यवस्थित उपमानोपमेयभावस्तत्रतु
विशेषाग्रहणादैच्छिकः स इति त्रिविधंदीपकावृत्तौभवेदावृत्तिदीपकं। वर्षत्यंबुदमालेयंवर्षत्येषाच
शर्वरी। उन्मिलंति कदंबानि स्फुटंति कुटजद्रुमाः॥ माद्यंति चातकास्तृप्ता माद्यंति च शिखावलाः।
दीपकस्यानेकोपकारार्थतया दीपस्थानीयस्य शब्दार्थस्य वा उभयोर्वा आवृत्तौ त्रिविधमावृत्तिदी
पकं। क्रमेणार्धत्रयेणोदाहरणानि। यथावा। उत्कंठयति मेघानां मालावर्गं कलापिनां। यूनां
चोत्कंठयत्यद्य मानसं मकरध्वजः। शमयति जलधरधारा चातकयूनां तृषं चिरोपनतां। क्षप
यति वधूलोचनधारा कामिप्रवासरुचिं। वदनेन निर्जितं तव निलीयते चंद्रबिंबमंबुधरे। अरविं
दमपि च सुंदरि निलीयते पाथसां पूरे। एवं चावृत्तीनां प्रस्तुतोभयविषयत्वाभावेपि दीपकच्छाया
पत्तिमात्रेण दीपकव्यपदेशः। वाक्ययोरेकसामान्ये प्रतिवस्तूपमा तु सा। तापेन भ्राजते सूरः शू
रश्चापेन राजते। यत्रोपमानोपमेयवाक्ययोरेकः साधारणो धर्मः पृथङ्निर्दिश्यते सा प्रति
वस्तूपमा। प्रतिवस्तु प्रतिवाक्यार्थं उपमा समानो धर्मोस्यामिति व्युत्पत्तेः। यथात्रैव राजत
इत्येक एव धर्म उपमानोपमेयवाक्ययोः पृथक् भिन्नपदाभ्यां निर्दिष्टः। यथावा। स्थि
रा शैली गुणवतां खलबुद्ध्या न बाध्यते। रत्नदीपस्य हि शिखा वात्ययापि न नाश्यते।
यथावा। तवामृतस्यंदिनि पादपंकजे निवेशितात्मा कथमन्यमिच्छति। स्थितेऽर
विंदे मकरंदनिर्भरे मधुव्रतो नेक्षुरसं हि वीक्षते। अत्र यद्यप्युपमेयवाक्ये अनिच्छ।

च

उमानवाक्येवीक्षैतिधर्मभेदःप्रतिभाति। तथापिवीक्षणमात्रस्यावर्जनीयस्यप्रतिषेधानर्हत्वादि
च्छापूर्वकवीक्षाप्रतिषेधोयमनिष्ठापर्यवसितएवेतिधर्मैक्यमनुसंधेयं। अर्थावृत्तिःप्रस्तुता
नामप्रस्तुतानांवा। प्रतिवस्तूपमातुप्रस्तुताप्रस्तुतानामितिविशेषः। अयंचापरोविशेषः। आवृ
त्तिदीपकेवैधर्म्येणनभवतिप्रतिवस्तूपमातुवैधर्म्येणापिदृश्यते। यथा। विद्वानेवहिजानाति
विद्वज्जनपरिश्रमं। नहिवंध्याविजानातिगुर्वींप्रसववेदनां। यदिसंतिगुणाःपुंसांविकसंत्ये
वतेस्वयं। नहिकस्तूरिकामोदःशपथेनविभाव्यते। चेद्बिंबप्रतिबिंबत्वंदृष्टांतस्तदलंकृतिः। त्व
मेवकीर्तिमान्राजन्विधुरेवहिकांतिमान्। यत्रोपमानोपमेयवाक्ययोर्भिन्नावेवधर्मौबिंब
प्रतिबिंबभावेननिर्दिष्टौतत्रदृष्टांतः। त्वमेवकीर्तिमानित्यत्रकीर्तिकांत्योर्बिंबप्रतिबिंबभावः।
यथावा। कामंनृपाःसंतुसहस्रशोन्येराजन्वतीमाहुरनेनभूमिं। नक्षत्रताराग्रहसंकुलापिज्योति
ष्मतीचंद्रमसैवरात्रिः। यथावा। देवींवाचमुपासतेहिबहवःसारंतुसारस्वतंजानीतनितरामसौ
गुरुकुलक्लिष्टोमुरारिःकविः। अब्धिर्लंघितएववानरभटैःकिंत्वस्यगंभीरतामापातालनि
मग्नपीवरतनुर्जानातिमंथाचलः। नन्वत्रोपमानोपमेयवाक्ययोर्ज्ञानमेकएवधर्मः इतिप्रतिव
स्तूपमायुक्तामैवं। अचेतनेमंथाचलेज्ञानस्यबाधितत्वेनतत्रजानीयुनेनसांगरागस्तनाव
धिपर्यंतसंस्पर्शमात्रस्यविवक्षितत्वादत्रोदाहरणपदावृत्तिदीपकविशेषःपूर्ववत्प्रस्तुताप्रस्तुता।

विषयत्वलंदृतोदृष्टव्यः। वैधर्म्येणाप्ययं दृश्यते। एतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च
नो द्विषः। तमांसि तिष्ठंति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलितां। वाक्यार्थयोः सदृश
योरैक्यारोपो निदर्शना। यद्दातुः सौम्यता सेयं पूर्णेंदोरकलंकता। अत्र दातृपुरुषसौम्यत्वस्य उ
पमेयवाक्यार्थस्य पूर्णेंदोरकलंकत्वस्य चोपमानवाक्यार्थस्य च यत्तच्छब्दाभ्यामैक्यारोपः। यथा वा।
अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थले ब्जमवरोपितं सुचिरमूषरे वर्षितं। श्वपुच्छमवना
मितं बधिरकर्णजापः कृतो धृतोंधमुखदर्पणो यदबुधो जनः सेवितः। अत्राबुधजनसेवाया अरण्य
रोदनादीनां च यत्तच्छब्दाभ्यामैक्यारोपः। पदार्थवृत्तिमप्येके वदंत्यन्यां निदर्शनां। त्वन्नेत्रयुगुलं धत्ते लीलां
नीलांबुजन्मनोः। अत्र नेत्रयुगले नीलांबुजगतलीलापदार्थारोपो निदर्शना। वियोगे गौडना
रीणां यो गंडतलपांडिमा। अदृश्यत स खर्जूरीमंजरीगर्भरेणुषु। एवमस्मिन्नुदाहरणे उपमेये उ
पमानधर्मारोपः। एतदुपमाने उपमेयधर्मारोप इति भेदः। उभयत्राप्यन्यधर्मस्यान्यत्रासंभ
वेन तत्समानधर्माक्षेपादौपम्यपर्यवसानं तुल्यं। इयं पदार्थवृत्तिनिदर्शना ललितोपमेति प
जयदेवेन व्याहृता। यद्यपि वियोगे गौडनारीणामिति श्लोकः। प्राचीनैर्वाक्यार्थवृत्तिनिदर्श
नाया मुदाहृतः तथापि विशिष्टयोर्धर्मिणोरैक्यारोपो वाक्यार्थवृत्तिनिदर्शना॥ उपमानोप
मेययोरन्यतरस्मिन्नन्यतरधर्मारोपः पदार्थवृत्तिनिदर्शनेति व्यवस्थामाश्रियास्माभिरय

मुदाहृतः। एवं च त्वयि सति शिवदार्यस्मसदर्थितानामितरमनुसरंतो दर्शयंतोर्थिमुद्रां। चरमचर
णपातैर्दुग्धं दोग्धुकामाः करभमनुसरामः कामधेनौ स्थितायाम्। दोर्भ्यामब्धिं तितीर्षंतस्तुष्टु
वुस्ते गुणार्णवं। इत्यादिषु वाक्यभेदाभाववाक्यार्थवृत्तिरेव निदर्शना विशिष्टयोरैक्यारोपे सद्भावा
वाक्यार्थयोः सदृशयोरिति लक्षणवाक्ये वाक्यार्थशब्देन बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टरू
प पयोः प्रस्तुताप्रस्तुतधर्मिणोर्विवक्षितत्वात्। एवं च। राजसेवा मनुष्याणामसिधारावलेहनं। पंचानन
परिष्वंगो व्यालीवदनचुंबनं। इत्यत्राप्रस्तुताप्रस्तुतवृत्तांतयोरेकैकपदोपात्तत्वेपि वाक्यार्थवृत्तिनिदर्श
नायां न क्षतिः। तयोर्बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टव्यापाररूपत्वादिति। अत एव निदर्शना
या रूपकाद्भेदः। रूपके ह्यविशिष्टयोरेव मुखचंद्रादिकयोरैक्यारोपः। अंघ्रिर्दंडो हरेरूर्ध्वमुत्क्षिप्तो
बलिनिग्रहे। विधिविष्टरपद्मस्य नालदंडो मुदेस्तु वः। इति विशिष्टरूपकोदाहरणेपि बिंबप्र
तिबिंबभावापन्नवस्तुविशिष्टता विधाविधातृविष्टरपद्मस्य नालश्लिष्टत्वरूपसाधारणधर्म
वत्तासंपादनार्थमेव तत्र विशेषणोपादानात्। प्रदातुः सोम्यते प्रादिनिदर्शनोदाहरणेषूदाहृतपू
र्वेंद्वादीनामानंदकरत्वादिनेवात्र विशेषणयोर्बिंबप्रतिबिंबभावाभावात्। यत्र तु विषय
विषयिविशेषणानां परस्परसादृश्येन बिंबप्रतिबिंबभावोस्ति। ज्योत्स्नाभस्मच्छुरणधव
ला बिभ्रती तारकास्थीन्यंतर्धानव्यसनरसिका रात्रिकापालिकीयं। द्वीपाद्द्वीपं भ्रमति दधती

चंद्रमुद्राकपोले न्यस्तं सिद्धांजनपरिमलं लांछनस्य छलेनेति सावयवरूपकोदाहरणे तत्रापि विषयविषयिणोस्तद्विशेषणानां च प्रत्येकमैक्यारोपः। ननु ज्योत्स्नादिविशिष्टरात्रिरूपविषयस्य भस्मादिविशिष्टकापालिकीरूपविषयिणश्च विशिष्टरूपेणैक्यारोपोऽस्ति। तस्माद्राजसेवा मनुष्याणामित्यादावपि वाक्यार्थवृत्तिनिदर्शनेत्युक्तं। मतांतरे त्विह पदार्थवृत्त्यैव निदर्शनया भाव्यं। अपरां बोधनं प्राहुः क्रियायासत्सदर्थयोः। नश्येद्राजविरोधीति क्षीणं चंद्रोदये तमः। उदयन्नेव सविता पद्मेष्वर्पयति श्रियं। विभावयन्समृद्धीनां फलं सुहृदनुग्रहं। कस्यचित्क्रियया विशिष्टस्य स्वक्रियया परान्प्रत्यसतः सतो वार्थस्य बोधनं यन्निबध्यते तदपरां निदर्शनामाहुः। असदर्थबोधने उत्तरार्द्धमुदाहरणं। तत्र नश्येदित्यस्य बोधयदिति वक्तव्ये बोधयदित्यस्य गम्यमानत्वादप्रयोगः॥ तत्र राज्ञा चंद्रेण सह विरुध्य स्वयं नाशक्रियया विशिष्टं तमः स्वकीयनाशक्रियया दृष्टांतभूतया अन्योऽप्येवं राजविरुद्धश्चेन्नश्येदित्यनिष्टपर्यवसायिनमर्थं बोधयदेव नष्टमिति बोधनादसदर्थनिदर्शना। तथा। तथा उत्तरश्लोके सविता स्वोदयसमय एव पद्मे लक्ष्मीमादधानस्तथा पद्मलक्ष्म्याधानक्रियया परान्प्रति समृद्धीनां फलं सुहृदनुग्रह एवेति श्रेयस्करमर्थं बोधयन्निबद्ध इति सदर्थनिदर्शना। यथा वा। उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवं। शैलशेखरगतः पृषद्गणश्चारुमारुतधुतः पतत्यधः। अत्र गिरिशेखरगतो वृष्टिबिंदुकणानां सं

दमारुतमात्रेणापि कंपितः पतत् लघोरुन्नतपदप्राप्तिः पतनहेतुरित्यसदर्थं बोधयन्निबद्ध इत्यसदर्थनिदर्शना। चूडामणिपदे धत्ते यो देवं रविमागतं। सतां कार्यातिथेयीति बोधयन् गृहमेधिनः॥ अत्र समागतं रविं शिरसा संभावयन् उदयाचलः स्वनिष्ठया रविधारणक्रियया समागतानां सतामेवं गृहमेधिभिरातिथ्यं कार्यमिति सदर्थं बोधयन्निबद्ध इति सदर्थनिदर्शना। अत्र केचित् केचिद्वाक्यार्थवृत्तिनिदर्शनाद्वयं असंभवद्वस्तुसंबंधनिबंधनेति तृतीयां तु संभवद्वस्तुसंबंधनिबंधनेति च व्यवहरंति। तथाहि। आद्यनिदर्शनायां वाक्यार्थयोरैक्यमसंभवत्तयोः साम्ये पर्यवस्यति। द्वितीयनिदर्शनायामपि अन्यधर्मोन्यत्रासंभवन् धर्मिणोः साम्ये पर्यवस्यति। तृतीयनिदर्शनायां तु स्वक्रियया परान् प्रति सदसदर्थबोधनं संभवदेव समतां गमयति करोति। बोधयन् गृहमेधिन इत्यादौ कारीषोग्निरध्यापयतीतिवत्समर्थाचरणे णिचः प्रयोगः। तथा च यथाकारोग्निः शीतापनयनेन बटून् अध्ययनसमर्थान् करोति। एवं वर्ण्यमानः पर्वतः स्वयमुपमानभावेन गृहमेधिन उक्तबोधनसमर्थान् कर्तुं क्षमते। यथायं पर्वतः समागतं रविं शिरसा संभावयति एवं गृहमेधी समागतं संतमुचितपूजया संभावयेदिति। अतः संभवती बोधनसंबंधनेयं इति। व्यतिरेकोथ विशेषश्चेदुपमानोपमेययोः। शैला इवोन्नताः संतः किंतु प्रकृतिकोमलाः। अयमुपमेयाधिक्यपर्यवसायी व्यतिरेकः। यथा वा। रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया

गुणैस्सामायांति शिल्लीमुखाः स्मरधनुर्मुक्तास्तथा मामपि। कांतापादतलाहतिस्तव मुदेस्तद्वन्ममाप्यावयोः सर्वंतुल्यमशोक केवलमहं धात्रा सशोकः कृतः। अनुभवपर्यवसायी यथा। दृढतरनिबद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य। कृपस्य कृपाणस्य च केवलमाकारतो भेदः। सहोक्तिः सहभावश्चेद्भासते जनरंजनः। दिगंतमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह। यथावा। छायां संश्रयते तले विटपिनां श्रांतेव पांथैः समं मूलं याति सरोजलस्य जडता ग्लानेव मीनैः सह। आचामत्यहितांशुदीधितिरपस्तप्तेव लोकैः समं निद्रा गर्भगृहं सह प्रविशति क्लांतेव कांताजनैः। जनरंजन इत्युक्तेरनेन सांद्रविहगंबुराशेरित्यादौ न सहोक्तिरलंकारः। विनोक्तिर्यद्विना किंचित्प्रस्तुतं हीनमुच्यते। विद्याहृद्यापि सा विद्या विना विनयसंपदम्। यथावा। यश्च रामं न पश्येत्तु यं च रामो न पश्यति। निंदितः स भवेल्लोके स्वात्माप्येनं विगर्हते। अत्र रामदर्शनं विना निंदितत्वं विनाशब्दमंतरेणापि दर्शितं। तच्चेत्किंचिद्विना रम्यं विनोक्तिः सापि कथ्यते। विनाखलैर्विभात्येषा राजेंद्र भवतः सभा। यथावा। आविर्भूते शशिनि तमसा मुच्यमानेव रात्रिर्नैशस्यार्चिर्हुतभुज इव च्छिन्नभूयिष्ठधूमा। मोहेनांतर्वरतनुरियं लक्ष्यते मुक्तकल्पा गंगारोधःपतनकलुषा गृह्णतीव प्रसादं। अत्र तमःप्रभृतीन्विना निशादि रम्यत्वं विनाशब्दमंतरेण दर्शितम्। समासोक्तिः परिस्फूर्तिः प्रस्तुते प्रस्तुतस्य चेत्।

अयमैंद्रीमुखं पश्य रक्तश्चुंबति चंद्रमाः। यत्र प्रस्तुतवृत्तांते वर्ण्यमाने विशेषणसाम्यबलादप्रस्तुतवृत्तांतस्यापि परिस्फूर्त्तिस्तत्र समासोक्तिरलंकारः। समासेन संक्षेपेण प्रस्तुताप्रस्तुतयोर्वृत्तांतयोर्वर्णनात्। उदाहरणमयमैंद्रीति। अत्र चंद्रस्य प्राचीप्रारंभसंबंधलक्षण उदये वर्ण्यमाने मुखशब्दस्य प्रारंभवदनसाधारण्याद्रक्तशब्दस्यारुणवर्णकामुकसाधारण्याच्चुंबतीत्यस्य प्रस्तुतार्थसंबंधमात्रपरस्य शक्त्यार्थांतरसाधारण्याच्चंद्रमःशब्दगतपुल्लिंगेन ऐंद्रीगतस्त्रीलिंगेन तत्प्रतिपाद्येंद्रसंबंधित्वेन चोपस्कृतात्परवनितासक्तपुरुषवृत्तांतः प्रतीयते। यथा वा। व्यावल्गत्कुचभारमाकुलकचं व्यालोलहारावलि प्रेंखत्कुंडलशोभिगंडयुगलं प्रस्वेदिवक्त्रांबुजं। शश्वद्दत्तकरप्रहारमधिकश्वासं रसादेतया यस्मात्कंदुक सादरं सुभगया संसेव्यते तत्कृती॥ अत्र कंदुकवृत्तांते वर्ण्यमाने व्यावल्गत्कुचभारमित्यादिक्रियाविशेषणसाम्याद्विपरीतरतासक्तानायिकावृत्तांतः प्रतीयते। पूर्वत्र विशेषणानि श्लिष्टानि इह साधारणानीति भेदः। सारूप्यादपि समासोक्तिर्दृश्यते। यथा। पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्यासं यातो घनविरलभावः क्षितिरुहां। बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति। यत्र वनवर्णने प्रस्तुते तत्सारूप्यात्कुटुंबिषु धनसंतानादिसमृद्ध्यसमृद्धिविपर्यासप्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेर्वृत्तांतः प्रतीयते। अत्र च विशेषणसाम्यात्सारूप्याद्वा यदप्रस्तुत

वृत्तांतस्य प्रत्यायनं तत्प्रवृत्ते विशेषणे तत्समारोपार्थे। सर्वथैवप्रस्तुतान्वयिनः कविसंरंभगोचरत्वा
योगात्। न तत्र समासोक्तावप्रस्तुतव्यवहारसमारोपश्चारुताहेतुः। ननु रूपकइवाप्रस्तुते अप्रस्तु
तरूपसमारोपोप्यस्ति। मुखचंद्र इत्यत्र मुखचंद्रत्वारोपहेतुमुखचंद्रपदशब्दसमभिव्याहारवदुक्ते
श्चुंबति चंद्रमा इत्यादिसमासोक्त्युदाहरणे चंद्रादौ राजत्वारोपहेतोस्तद्वाचकपदसमभिव्याहार
स्याभावात्। निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः। धारानिपातैः सह किंतु
वांतश्चंद्रोयमित्यार्त्ततरं ररास। इत्याद्येकदेशविवर्त्तिरूपकोदाहरण इवाप्रस्तुतेऽप्रस्तुतरूपसमा
रोपगमकस्याप्यभावात्। तत्र हि विद्युन्नयनेस्त्रियत्त्रानिरीक्षणानुगुण्यादुत्तरपदार्थप्रधानम
यूरव्यंसकादिसमासव्यवस्थितो उत्तरपदार्थे तद्भूतनयनान्वयानुरोधात्। पयोदेनुक्तमपि दुष्ट
पुरुषत्वारोपणं गम्यमुपगम्यते। न चैवं तथा निरीक्षणवत् त्वय्यागते किमिति वेपत एष सिंधुरि
ति श्लोके सेतुवदित्यादिवच्च प्रस्तुतासाधारणवृत्तांत उपात्तोस्ति। नापि श्लिष्टसाधारणादि
विशेषणसमर्पितयोः प्रस्तुताप्रस्तुतयोर्वृत्तांतयोरप्रस्तुतस्य वृत्तांतस्य विद्युन्नयनवत्प्राधान्य
मस्ति। येन तदनुरोधात् त्वं सेतुमंथनकृदित्यत्रैवानुक्तमपि प्रस्तुतरूपसमारोपमभ्युपगच्छेत्। १०
तस्माद्विशेषणसमर्पिताप्रस्तुतव्यवहारसमारोपमात्रमिह चारुताहेतुः। यद्यपि प्रस्तुताप्रस्तु
तवृत्तांतयोरिह श्लिष्टसाधारणविशेषणसमर्पितयोर्भिन्नपदोपात्तविशेषणयोरिव विशे

व्येणैव साक्षादन्वयादस्ति समप्राधान्यं। तथाप्यप्रस्तुतवृत्तांतान्वयानुरोधान्नप्रस्तुते प्रस्तु
तसमारोपोंगीकार्यः। तथाहि। यथाप्रस्तुतविशेष्येऽप्रस्तुतवृत्तांतस्य नास्त्यन्वययोग्यता ॥
तथैवाप्रस्तुतेपि जारादौ नास्ति प्रकृतवृत्तांतस्यान्वययोग्यता। एवं च समप्रधानयोः प्रकृताप्रकृतवृत्तां
तयोः अन्यतरस्या[illegible]मारोपेऽभ्युपगंतव्ये श्रुत एव प्रस्तुतेप्रस्तुतवृत्तांतस्यारोपश्चारुताहेतुरिति यु
क्तं। नन्वेवं सति विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः। विशेषणानां साम्येन यत्र प्रस्तुत
वर्तिनां अप्रस्तुतस्य गम्यत्वं सा समासोक्तिरिष्यत इत्यादीनि प्राचीनानां समासोक्तिलक्षणानि
नसंघटेरन्। प्रस्तुतश्लिष्टसाधारणादिरूपविशेषणसमर्पितानुरागपूर्वकवदनचुंबनायप्रस्तुतवृ
त्तांतसमारोपमात्रस्य चारुताहेतुत्वाभ्युपगमेन विशेषणसाम्यवृत कामुकाद्यप्रस्तुतधर्मि
व्यंजिनानपेक्षणादिति चेत् उच्यते। स्वरूपतोऽप्रस्तुतवृत्तांतस्यारोपो न चारुताहेतुः। किं
त्वप्रस्तुतकामुकादिसंबंधित्वेनावगम्यमानस्य तस्यारोपः। त[illegible]भूतस्यैव रसानुगुणत्वा
त्। न च तावदवगमने विशेषणपदानां सामर्थ्यमस्ति। तत्र श्लेषादिमहिम्ना विशेषणपदैः स्व
रूपतः समर्पिते नवदनचुंबनादिना तत्संबंधिनि कामुकादौ अपि व्यक्ते पुनस्तदीयत्वानु
संधानं तत्र भवति यथा स्वरूपतो दृष्टेन राजाश्वादिना तत्संबंधिनि राजादौ स्मारिते पु
नरश्वादौ तदीयत्वानुसंधानवदिति ॥ विशेषणसाम्येन नैव वाच्योपस्कारकस्य प्रस्तुतव्यं
जनापेक्षा। अत एव श्लिष्टविशेषणायामिव साधारणविशेषणायामप्यप्रस्तुतव्यवहा

रसमारोपरसेवप्राचीनानांप्रवादः। कंदुकेयावल्गत्कुचभारमित्यादिविशिष्टवनितासिव्यत्वस्यका
मुकसंबंधित्वेनैवसमारोपणीयत्वे। तत्स्वरूपतः कंदुकेपितस्यसत्वेनासमारोपणीयत्वात्। किंचसारू
प्यनिबंधित्वेनोदाहृतायां समासोक्तावप्रस्तुतवृत्तांतस्य। शब्दार्थस्याप्रस्तुतवृत्तांतरूपेणैवग
म्यता। तेनरूपेणतत्समारोपसिद्धेरन्यत्रापितथैवयुक्तमितियुक्तमेवप्राचीनानांलक्षणमि
ति विभावनीयम्। अलंकारः परिकरः साभिप्रायेविशेषणे। सुधांशुकलितोत्तंसस्तापंह
रतुवः शिवः। अत्रसुधांशुकलितोत्तंसइतिविशेषणंतापहरणसामर्थ्याभिप्रायं। यथावा।
तवप्रसादात्कुसुमायुधोपिसहायमेकंमधुमेवलब्ध्वा। कुर्यांहरस्यापिपिनाकपाणेर्धैर्यच्यु
तिंकेममधन्विनोन्ये। अत्रपिनाकपाणेरितिहरविशेषणंकुसुमायुधइत्यर्थलभ्याहमर्थविशे
षणंचसांससारायुधत्वाभिप्रायगर्भंयथावा। सर्वाशुचिनिधानस्यकृतघ्नस्यविनाशिनः।
शरीरकस्यापिकृतेमूढाःपापानिकुर्वते। अत्रशरीरविशेषणानितस्यहेयत्वेनासंरक्षणीय
त्वाभिप्रायगर्भाणि। यथावा। व्यासंछनेकतयास्थितंश्रुतिगणंजन्मीनवल्मीकतोनाभौना
भवमच्युतस्यसुमहद्भाष्यंच्च। नापिषिषि। चित्रार्थांनबृहत्कथामचकथंसुत्राम्णोनासंगुरु
र्देवत्वद्गुणवृंदवर्णनमहंकर्त्तुंकथंशक्नुयां॥ अत्रश्रुतिगणंनव्यासच्छिन्नमित्यादीनिविशेषणा
निस्वस्मिन्व्यासाद्यसाधारणप्रतिषेधमुखेननाहंव्यासइत्याद्यभिप्रायगर्भाणि। तत्रो
दाहरणयोरेकैकंविशेषणं। समनंतरयोःप्रत्येकंबहूनिविशेषणानितत्रापिप्रथमोदाहरणे

सर्वाणिविशेषणान्येकाभिप्रायगर्भाणिपदार्थरूपाणिच। द्वितीयोदाहरणेभिन्नाभिप्रायगर्भाणिवाक्यार्थरूपाणिचेतिभेदः। तेषुव्यंग्यार्थसद्भावेपिनव्यध्वनिव्यपदेशाः। तापहरणेशिवस्यैवेमुसन्यायेनसर्वधन्विधैर्यभंजकत्वेशारीरसंरणार्थंपापमाचरतांमूढत्वेस्वस्यवर्णनीयराजगुणकथनाशकत्वेचवाच्यएवोपस्कारकत्वादतएवव्यंग्यार्थस्यवाच्यपरिकरत्वात्परिकरइतिनामास्यालंकारस्य। केचित्तुनिःप्रयोजनविशेषणोपादानेऽपुष्टार्थदोषस्योक्तत्वात्सप्रयोजनत्वंविशेषणस्यदोषाभावमात्रंनकश्चिदलंकारः। एकनिष्ठतादृशानेकविशेषणोपन्यासःपरंवैचित्र्यविशेषात्परिकरइत्यलंकारमध्येपरिगणितइत्याहुः। वस्तुतस्तुअनेकविशेषणोपन्यासएवपरिकरइतिननियमः। श्लेषयमकादिपुष्टार्थत्वदोषाभावेनतत्रैकस्यापिविशेषणस्यसाभिप्रायविन्यासेविशेषसद्भावात्परिकरत्वोपपत्तिः। यथा। अतियजेतनिजांयादिदेवतामुभयतश्च्यवतेजुषतेप्यघं। क्षितिभृतैवसदैवतकावयंवनवतानवताकिमहिद्रुहा। अत्रपुरुहूतपूजोद्युक्तान्नंदादीन्प्रतिभगवतःकृष्णस्यवाक्येगोवर्द्धनगिरिरेवास्माकंरक्षकत्वेनदैवतमितिसएवपूजनीयःनारक्षकःपुरुहूतइत्येवंपरंवा नवतेतिगोवर्द्धनगिरेर्विशेषणंकाननवत्त्वनिर्झरादिमत्वाच्चपुष्पफलमूलतृणजलादिभिरारण्यकानामस्माकंअस्मत्प्रधानानांचगवामयमेवरक्षकइत्यभिप्रायविशेषणविन्यासस्यविच्छित्तिविशेषणवशादलंकारत्वेसिद्धावन्यत्रापिसुधांशुकलितोत्तंसइत्यादौतस्यात्मलाभोनवार्यते। अत्रापिच एकपदार्थहेतुकंकाव्यलिंगमलंकारइतिसर्वसंमतं। तद्वदेकस्यापिविशेषणस्यसाभि

प्रायस्यालंकारसंयुक्तमेव। साभिप्रायेविशेष्येतु भवेत्परिकरांकुरः। चतुर्णां पुरुषार्थानां दाता
देवश्चतुर्भुजः। अत्र चतुर्भुज इति विशेषणं पुरुषार्थचतुष्टयप्रदानसामर्थ्याभिप्रायगर्भं।
यथावा। फणींद्रस्तेगुणान्वक्तुं लिखितुं हैहयाधिपः। द्रष्टुमाखंडलः शक्तः काहमेवंविधान्गुणान्।
फणींद्र इत्यादिविशेष्यपदानि सहस्रवदनाद्यभिप्रायगर्भाणि। नानार्थसंश्रयः श्लेषो वर्ण्या
वर्ण्योभयाश्रितः। सर्वदो माधवः पायात्स योगंगामदीधरत्। अब्जेन त्वन्मुखं तुल्यं हरि
णाहितशक्तिना। उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः। अनेकार्थशब्दविन्यासः
श्लेषः प्रकृतानेकविषयः अप्रकृतानेकविषयः प्रकृताप्रकृतानेकविषयश्च। सर्वदेत्यादी
नि क्रमेणोदाहरणानि। अत्र सर्वदोमाधवइति स्तोतव्यत्वेन प्रकृतयोर्हरिहरयोः कीर्त्तनेप्र
कृतश्लेषः अब्जं कमलमन्यश्चंद्रस्तयोरुपमानमात्रत्वेनाप्रकृतयोः कीर्त्तनमित्यप्रस्तु
तश्लेषः वाहिनीपतिः सेनापतिः समुद्रश्च। तत्र समितौ शस्त्रप्रपातोत्थरुधिरस्य सेनाप
तेर्वर्णनं प्रकृतमिति प्रकृताप्रकृतश्लेषः। यथावा। त्रातः काकोदरो येन द्रोग्धापि क
रुणात्मना। पूतनामारणख्यातः स मेस्तु शरणं प्रभुः। नीतानामाकुलीभावं लुब्धैर्भूरि
शिलीमुखैः। सदृशे वनवृद्धानां कमलानां तदीक्षणे। असावुदयमारूढः कांतिमान्रक्त
मंडलः। राजा हरति लोकस्य हृदयं मृदुभिः करैः। अत्राद्ये स्तोतव्यत्वेन प्रकृतयो रामकृष्ण
योः श्लेषः द्वितीयउपमानत्वेनाप्रकृतयोः पद्महरिणयोः श्लेषः। तृतीये राजवर्णनप्रस्तावे

काकोदरः फ
णी

मृगभेदे च क
मलइतिमेदि
नी

प्रकृतस्य प्रत्यग्रोदितचंद्रस्याप्रकृतस्य नवाभिषिक्तनृपतेश्च श्लेषः। यदत्र प्रकृताप्रकृतश्लेषोदाहरण
राजबलशालिनि मूलघातमिच्छंति प्रांचः। तत्प्रकृताभिधानमूलकस्योपमादेरलंकारस्य व्यंग्यत्वा
भिप्रायं। न तु प्रकृतार्थस्यैव व्यंग्यत्वाभिप्रायं। अप्रकृतार्थस्यापि शक्त्या प्रतिपाद्यस्याभिधेयस्यत्वाव
श्यंभावेन व्यंजनानपेक्षत्वात्। यद्यपि प्रकृतार्थप्रकरणबलात्स्फुटं। दृष्टिं तु प्रविष्टे तस्यैव पश्चान्नृपति
ग्राह्यधनादिवाचिनां राजकरादिपदानां। अन्योन्यसन्निधानबलात्तद्विषयशक्त्यंतरोन्मेषपूर्वक
मप्रयच्छन्नार्थः स्फुरतु। नैतावता तस्य व्यंग्यत्वं। शक्त्या प्रतिपाद्यमाने सर्वथैव व्यक्त्यनपेक्षणात्। प
र्यवसितप्रकृतार्थाभिधानपश्चात्स्फुरतीति चेत् कामं गूढश्लेषो भवतु। अस्ति चान्यत्रापि गूढः श्लेषः।
यथा। अयमितिजरठाः प्रकामगुर्वीरलघुविलंबिपयोधरोपरुद्धाः। सततमसुमतामग
म्यरूपाः परिणतदिक्करिकास्तटीर्बिभर्त्ति। मंदमग्निंमधुरर्यमोपलत्वाद्दर्शितश्वयथुश्चाभ श्व
वत्तमः। दृष्ट्यास्तिमिरजं शिशिरेदोषमोषधिपतेरसन्निधौ। अत्र हि समासोक्त्युदाहरणयोः
प्राकरिणिकेर्थे प्रकरणवशात्स्फुटं दृष्टिं तु प्रविष्टे विशेषणसाम्यादप्रकृतोपि रविकरयोर्वृत्तांतादिः प्र
तीयते। तत्र समासोक्तेरभंगश्लेषइतिसर्वेषामभिमत एव। एवमन्यत्रापि श्लेषे गूढध्वनि
बुद्धिर्न कार्या। रम्याइतिप्राप्तवतीः पताकारागंविविक्ताइतिवर्द्धयंतीः। यस्यामसेवंतनमद्वली
काः समंवधूभिर्वलभीर्युवानः। अत्र द्वितीयांतादिविशेषणासमर्पितार्थांतराणां शब्दसामर्थ्य

वधूभिरन्वयः। विभक्तिभेदात्। न च विभक्तिभेदेपि तदन्वयापेक्षितंकंसाम्यं धर्म्यमिह निबद्धमस्ति
यतः। एतस्मिन्नधिकपयःश्रियं वहंत्यः संक्षोभं पवनभुवा जवेन नीताः। वाल्मीकेररहितराम
लक्ष्मणानां साधर्म्यं दधति गिरां महासरस्यः। इत्यत्रैवाक्षिप्तश्लेषो भवेत्। समभेतक्रियाविशेष
णं तु सहार्थत्वेनाप्युपपन्नं वधूषु श्लिष्टविशेषणार्थान्वयात्प्रागप्रतीतं साधर्म्यं नालंबते तस्मादर्थ
सौंदर्यबलादेव तदन्वयानुसंधानमिति गूढश्लेषः। तदनु तद्बलादेव समशब्दस्य साधर्म्यार्थकल्प
नमिति वाच्येतेवोपमालंकारस्य तदंगमयं श्लेष इत्यलमतिप्रपंचेन। तदित्थं श्लेषत्रैविध्यं। ए
च वं श्लेषः प्रकारांतरेणापि द्विविधः संपन्नः। उदाहरणगतेषु अत्र कीलालवाहिनीत्यादिशब्देषु पर
स्परविलक्षणां पदभंगमनपेक्ष्य नानार्थकोडीकारादभंगश्लेषः। सर्वदो माधवः योगंगां हरिणा
हितसक्तिनेत्यादिषु परस्परविलक्षणपदभंगमपेक्ष्य नानार्थकोडीकारात्सभंगश्लेष इति। तत्र
सभंगश्लेषः शब्दालंकारः। अभंगश्लेषस्त्वर्थालंकार इति केचित्। उभयमपि शब्दालंकारम
न्ये। उभयमप्यर्थालंकार इति स्वाभिप्रायः। एतद्विवेचनं चित्रमीमांसायां द्रष्टव्यम्। अप्रस्तुत
प्रशंसा स्यात्सा यत्र प्रस्तुताश्रया। एकः कृती शकुंतेषु योन्यं शक्रान्न याचते। यत्राप्रस्तुतवृ
त्तांतवर्णनं प्रस्तुतावगतिपर्यवसायि तत्राप्रस्तुतप्रशंसालंकारः। अप्रस्तुतवृत्तांतवर्णनेन
प्रस्तुतावगतिश्च प्रस्तुताप्रस्तुतयोः संबंधे सति भवति। संबंधश्च सारूप्यसामान्यविशेषभा

कार्यकार्यीरणात्त्रावोवासंभवति। तत्रसामान्यविशेषभावेसामान्याद्विशेषस्यविशेषाद्वासामान्यस्या
वगतौद्वैविध्यं। कार्यकारणभावेपिकार्यात्कारणस्यकारणाद्वाकार्यस्यावगतौद्वैविध्यं। सारूप्यत्वे
कोभेदइत्यस्याःपंचप्रकाराः। यदाहुः। कार्येनिमित्तेसामान्येविशेषेप्रस्तुतेसतितदन्यस्यवचस्तु
ल्येतुल्यस्यादितिपंचधेति। तत्रसारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणं। एकःकृतीति। अप्रस्तुत
स्यघातकस्यप्रशंसाप्रशंसनीयत्वेनप्रस्तुतेतत्स्वरूपच्छेदेभ्यायाचनान्निवृत्तमानिनिपर्यवस्यति
यथावा। आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितोमृगपतेःपदवींयदिश्वा। मत्तेभकुंभतट
पाटनलंपटस्यनादंकरिष्यतिकथंहरिणाधिपस्य। अस्यत्रशुनकस्यनिंदानिंदनीयत्वेनप्रस्तु
ततत्स्वरूपकृत्रिमवेषव्यवहारादिमात्रेणविद्धत्तामभिनयतिवैद्येयपर्यवस्यति। यथावा। अं
तःछिद्राणिभूयांसिकंटकाबहवोबहिः। कथंकमलनालस्यमाभूवन्भंगुरागुणाः। अत्रक नर
मलवृत्तांतकीर्त्तनंतत्स्वरूपबहिःकलहेषुजाग्रत्सुभ्रातृपुत्रादिभिरंतःकलहंकुर्वाणेपुरुषेप
र्यवस्यति। एवंवलक्ष्यलक्षणयोःप्रशंसाशब्दःस्तुतिनिंदास्वरूपाख्यानसाधारणकीर्त्तनमात्र
पराइष्टव्यः। सामान्यनिबंधनायथा। विधायवैरंसामर्षेनरोऽरौयउदासते। निक्षिप्योदर्चिषंक
क्षेशेरतेतेभिमारुतं। अत्रप्रागेवसामर्षेशिशुपालेरुक्मिणीहरणादिनावैरंद्व्कृतवता
क[illegible]छेनतस्मिन्नुदासितुमयुक्तमितिवक्तव्येऽर्थेप्रस्तुततत्समर्पणायनार्थसामान्यमभिहितं

यथावा। सौहार्दस्वर्णरेखाणामुच्चावचभिदाजुषां। परोक्षमिति कोप्यस्ति परीक्षानिकषोपलः। अत्र यदित्वं प्रत्यक्षएव परोक्षेपि ममहितमाचरसि तदात्वमुत्तमंसुहृदिति विशेषवक्तव्यत्वे नप्रस्तुते सामान्यमभिहितं। विशेषनिबंधना यथा। अंकाधिरोपितमृगश्चंद्रमामृगलांछनः। केसरीनिष्ठुरक्षिप्तमृगयूथो मृगाधिपः। अत्ररूढंप्रतिबलभद्रवाक्येमार्दवदूषणपरपूर्वप्रस्तावनानुसारेणक्रूर एवख्यातिभाग्भवति। नतुमृदुरिति सामान्येनवक्तव्ये [illegible]तस्थापनार्थमप्रस्तुतोविशेषोभिहितः। एवंबृहत्कथादिषुसामान्यतः किंचिदर्थंप्रस्तुत्य तद्विवरणार्थं अप्रस्तुतकथाविशेषोदाहरणेष्वियमेवाप्रस्तुतप्रशंसाद्रष्टव्या। कारणनिबंधनायथा। हृतसारमिवेंदुमंडलंदमयंतीवदनाय वेधसा। कृतमध्यबिलंविलोक्यते धृतगंभीरखनीखनीलिम। अत्राशाकरणींकेंदुमंडलगततयोत्प्रेक्ष्यमाणेनदमयंतीवदननिर्माणार्थंसारांशहरणे[illegible]तत्कार्यरूपावर्णनीयतयाप्रस्तुतादमयंतीवदनगतोलोकोत्तरसौंदर्यविशेषःप्रतीयते। यथावा। मदीयवरदराजस्तवे। आश्लिष्यनूनममृतद्युतयः पदंतेदेहक्षयोपनतदिव्यपदाभिमुख्याः। लावण्यपुण्यनिचयंसुहृदिस्त्वदास्येविन्यस्ययांति मिहिरंप्रतिमासभिन्नाः। अत्राशाकरणिकचंद्रगततयोत्प्रेक्ष्यमाणेन लावण्यपुण्यनिचयविन्यासेनकारणेनतत्कार्यमनंतकोटिचंद्रलावण्यशालित्वमनन्यमुखसाधारणंभगवन्मुख

वर्णनीयतयाप्रस्तुतंप्रतीयते। तथाहि। चंद्रस्तावन्मंत्रलिंगाद्वृद्धिक्षयाभ्यां भेदाध्यवसायाद्वा प्रतिमा
सभिन्नत्वेन चवर्णितः तेनानीताश्चंद्रानंतकोटय इति लब्धं कालस्यानादित्वात्। सर्वेषां तेषामाका
शाश्रयणं श्लेषमहिम्ना भगवच्चरणसमाश्रयत्वेनाध्यवसितं भगवच्चरणप्रपन्नानां चंद्रलक्षणयोपस्थि
तोपरमपदप्राप्त्याभिमुख्यं तदानीमेव सुहृद्भिस्स्वकीयसुकृतस्तोमनिवेशानंततः सूर्यमंडलप्रा
प्तिर्भूयत इति सर्वश्रुतिसिद्धमिति तदनुरोधेन तेषां देहक्षयकालस्य अमावास्यारूपस्योपस्थितौ सूर्यमं
डलप्राप्तेः प्राक्प्रत्यक्षसिद्धं पुण्यत्वेन निरूपितस्य लावण्यस्य प्रहाणं निमित्तीकृत्य तस्य चंद्रसादृश्य
स्वरूपापचरितं तत्सौहार्दवंति भगवन्मुखे न्यसनमुत्प्रेक्षितं। यद्यपि सुहृद्भ्यस्ते तावत्स्वल्पपुण्य
संक्रमणं भवति तथाप्यत्र सुहृदीत्येकवचनेन भगवन्मुखमेव चंद्रस्य सुहृद्भूतं न मुखांतराणीति चंद्र
सादृश्यगंधस्याप्यभावादिति भगवन्मुखस्येतरमुखेभ्यो व्यतिरेकोऽभिव्यंजितः। तलभ्यतस्मि
न्नेव सर्वेषां चंद्राणां स्वस्वयावल्लावण्यपुण्यविन्यसनोत्प्रेक्षणेन प्राग्वर्णितः प्रस्तुतोऽर्थः स्पष्टमे
वप्रतीयते। यद्यपि श्रुतौ सूर्यमंडलप्राप्त्यनंतरभाविविरजानद्यतिक्रमणानंतरमेव सुहृत्सु
सुकृतसंक्रमणं श्रूयते। तथापि शारीरकशास्त्रे तस्यार्थवशात्प्राग्भावः स्थापितः इति तदनु
सारेण विन्यस्य मिहिरं यांतीत्युक्तं। कार्यनिबंधनायथा। नीयूलवदंघ्रिनखधावनतोयल
ग्नास्तत्कांतिलेशकणिका जलधिं प्रविष्टा॥ ताएव तस्य मथनेन घनीभवंत्यो नूनं समुद्र
नवनीतपदं प्रपन्नाः। अत्र भगवत्पदांबुजक्षालनतोयरूपायाः दिव्यसरितिओलक्तक

रसादिवल्लग्नानांतयासहसमुद्रंप्रविष्टानांनखकांतिलेशकणिकानांपरिणामतयासंभाव्यमा
नेनसमुद्रनवनीतपदवाच्येनचंद्रेणकार्येणतन्नखकांत्युत्कर्षःप्रतीयते।यथावा।अस्याश्चेद्गति
सौमार्यमधुनाहंसस्यगर्वैरलंसंलापोयदिसाध्यतांपरभृतैर्वाचंयमत्वव्रतम्।अंगनामको
ठरतायदिदृषत्प्रायैवसामालतीकांतिश्चेत्कमलाकिमत्रबहुनाकाषायमालंबतां।अत्रनाय
कागत्यादिषुवर्णनीयत्वेनप्रस्तुतेषुहंसादिगतिगर्वशंसादिरूपाण्यौचित्येनसंभाव्यमानानि
कार्याणिक्रमेणाभिहितानि।एतानिचपूर्वोदाहरणवन्नवस्तुकार्याणिकिंतुतन्निरीक्षणकार्या
णि।लज्जातिरश्चांयदिचेतसिस्यादसंशयंपर्वतराजपुत्र्याः।तंकेशपाशंप्रसमीक्ष्यकुर्युर्वालप्रि
यत्वंशिथिलंचमर्यः।इत्याद्युदाहरणांतरेतथैवस्पष्टं।अंगानामकठोरतेतितृतीयपादेतुवर्ण
नीयांगसौकुमार्यातिशयनिरीक्षणकार्यत्वमपिनार्थोक्षेपमालतीकठोरत्वेविवक्षितं।प्रतियो
गिविशेषापेक्षकठोरत्वस्यतदकार्यत्वात्।किंतुतदुत्तरेवेदमपित्वदंगमार्दवेदृष्टेइत्युदाहर
णेतथैवस्पष्टं।अर्थस्यकार्यत्वइवतद्बुद्धेःकार्यत्वेपिकार्यनिबंधनत्वंनहीयतइतितादृशान्यपि
कार्यनिबंधनाप्रस्तुतप्रशंसायामुदाहृतानिप्राचीनैः।वस्तुतस्तुतदतिरेकेपिनदोषः।नह्यप्र
स्तुतप्रशंसायांप्रस्तुताप्रशंसयोःपंचविधएवसंबंधइतिनियंतुंशक्यतेसंबंधांतरेष्वपित
दर्शनात्।यथा।तापत्रयौषधवरस्यतवस्मितस्यनिःश्वासमंदमरुताविलुषीकृतस्य

एते कउंकरचयाइव विप्रकीर्णा जैवातृकस्य किरणा जगति भ्रमंति। अत्र ह्यप्रस्तुतानां चंद्रकिरणानां भगव
न्मंदस्मितदिव्योषधान्यविश्लेषकउंकरचयत्वोत्प्रेक्षणेन भगवन्मंदस्मितस्य तत्सारतारूपः कोप्युत्कर्षः प्रती
यते न च धान्यकउंकरचययोः कार्यकारणभावादिसंबंधोस्ति। अतः सहोत्पत्त्यादिकमपि संबंधांतरमाश्रय
णीयमेवमुपमानोपमययोर्वाश्रित्य तत्र कविकल्पितकार्यकारणभावनिबंधनेप्रस्तुतप्रशंसेदर्शीति।
ततोन्यत्रापि दृश्यते। यथा। कालिंदि ब्रूहि कुंभोद्भव जलधिरहं नाम गृह्णासि कस्माच्छत्रोर्मे नर्मदाहं सम
पिबसि मे नाम कस्मात्सपत्न्याः। मालिन्यं तर्हि कस्मादनुभवसि मिलत्कज्जलैर्मालवीनां नेत्रांभोभिः
किमासां समजनि कुपितः कुंतलक्षोणिपालः। अत्र किमासां समजनीति मालवीनां यथा रोदनस्य निमित्ते
पृष्टे तत्प्रियमरणरूपनिमित्तमनाख्याय कुपितः कुंतलक्षोणिपाल इति तत्कारणमभिहितमपि कारण
निबंधना। मालवान्प्रस्थितेन कुंतलेश्वरेण निर्जिताः इति पृष्टे तद्ध्यानांतरभाविजलधिनर्मदाप्रश्नो
त्तररूपं कार्यमभिहितमिति। अत्रैव कार्यनिबंधनापि पूर्वस्यां प्रश्नः शब्दः। अस्यामार्य इति
भेदः। प्रस्तुतेनाप्रस्तुतस्य द्योतने प्रस्तुतांकुरः। किं भृंग सत्यां मालत्यां केतक्या कंटकोत्कया। यत्र
प्रस्तुतेन वर्ण्यमानेनाभिमतमन्यत्प्रस्तुतं द्योत्यते तत्र प्रस्तुतांकुरालंकारः। उत्तरार्द्धमुदाहरणं।
रहः प्रियतमेन साकमुद्याने विचरंती काचिद्भृंगं प्रत्येवाहेति वाच्यार्थस्य प्रस्तुतत्वं। न चानामंत्रणीया

मंत्रणेन वाच्यासंभवाद् प्रस्तुतमेव वाच्यमिह सरूपप्रस्तुतावगतये निर्दिष्टमिति वाच्यं। मौग्ध्याद्विनाभं
गाद्वा यथा मंत्रणस्य लोके दर्शनात्। यथा। कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं वैराग्या
दिव साधु वदसि किमिति कस्मादिदं कथ्यते। वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते न च्छायापि
परोपकारकारिणी मार्गस्थितस्यापि मे। अत्र चेतनाचेतनप्रश्नोत्तरवर्त्तिते तिर्यगामंत्रणस्यासंतम
संभावितत्वाभावात्। एवं प्रस्तुतेन वाच्येन भंगोपपत्तिरूपेणापत्न्याः कुलवध्वाः सौंदर्याभिमानशा
लिन्याः क्रूरजनपरिवृत्तिदुष्प्रापायां परवनितायां विटसर्वस्वापहरणसंकल्पदुरासदायां कंटकसं
कुलकेतकीकल्पायां प्रियतमं प्रत्युपालंभो द्योत्यते। यथा वा। अन्यासु तावदुपमर्दसहासु भृंग
लोलं विनोदय मनः सुमनोलतासु। बालामजातरजसं कलिकामकाले व्यर्थं कदर्थयसि किं नव
मल्लिकायाः॥ अत्राप्युद्यानमध्ये चरंतं भृंगं प्रत्यस्य समुपालंभ इति वाच्यार्थस्यापि प्रस्तुतत्वं। इदं च
प्रौढांगनासु विद्यमानासु बालिकां रतये क्लेशयसीति कामिनं निभृतमेव तत्कस्याश्चिद्विदग्धाया
वचनमित्युपालंभो द्योत्यते। यथा वा। कोशद्वंद्वमियं दधाति नलिनी कादंबचंचुक्षतं धत्ते चूत
लता नवं किसलयं पुंस्कोकिलास्वादितं। इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घिकायास्तटे चे
लांतेन तिरोदधे स्तनतटं बिंबाधरं पाणिना। अत्रेयमिति नलिनी व्यक्तिविशेषनिर्देशेन दीर्घि

यास्लेटऽसनेन वाच्यार्थस्य प्रस्तुतत्वं स्पष्टं। प्रस्तुतांतरद्योतनं च स्वयमेव कविना आविष्कृतमुत्त
रार्द्धे। अत्राद्योदाहरणयोरन्यापदेशध्वनिमाह लोचनकारः। अप्रस्तुतप्रशंसायां वाच्योऽर्थोऽप्र
स्तुतत्वादवर्णनीय इति तत्राभिधायां पर्यवसितायामर्थसौंदर्यबलेनाभिमतार्थव्यक्तिर्ध्वनि
रेवेति। वस्तुतस्तु अलंकारस्वरूपध्वनिरिति व्यवस्थितं चित्रमीमांसायां। तृतीयोदाहरणस्य
त्वलंकारस्यैव लक्ष्यस्यापि न विवादः। उक्तं हि ध्वनिकृता। शब्दार्थशक्त्याक्षिप्तोऽपि व्यंग्योऽर्थः कवि
ना पुनः यत्राविःक्रियते स्वोक्त्या सान्यैवालंकृतिर्ध्वनेरिति। एतानि सारूप्यनिबंधनान्युदाह
रणानि। संबंधांतरनिबंधनान्यपि कथंचिद्व्यंग्ययोः प्रस्तुतत्वलंभनेनोदाहरणीयानी
ति दिङ्मात्रमुदाह्रियते। रात्रिः शिवा काचन संनिधत्ते विलोचने जागरतमप्रमत्ते। समानध
र्मा युवयोः सकाशे सखा भविष्यत्यचिरेण कश्चित्। अत्र शिवसारूप्यमिव तदेकदेशलयात
द्वाच्यमावयं भाललोचनमपि शिवरात्रिमाहात्म्यप्रयुक्तत्वेन वर्णनीयमिति तन्मुखेन वक्तुस्स्वं
शिवसारूप्यं गम्यं। यथा वा। वहंती सिंदूरं प्रबलकबरीभारतिमिरत्विषां वृंदैर्बंदीकृतमिव
नवीनार्ककिरणं। तनोतु क्षेमं वस्तव वदनसौंदर्यलहरीपरीवाहस्रोतःसरणिरिव सीमंत
सरणिः। अत्र वर्णनीयत्वेन प्रस्तुतायाः सीमंतसरण्या वदनसौंदर्यलहरीपरीवाहत्वारो

क्षणेन परिपूर्णे तटाकपरिवाहवत्करणीभूतास्वस्थाने सौंदर्यसमृद्धिः प्रतीयते। सापि वर्णनीयत्वेन प्रस्तुतैव। यथा वा। अंगासंगिमृणालकांडमयते भृंगाद्विरोषांरुचिं नासामौक्तिकमिंदुनीलसरणिः श्वासानिलान्नूगाहते। दत्तेयं हिमवालुकापि कुचयोर्धत्ते क्षणं दीपतां तन्व्याः पतितांबुवत्करतले धारांबु संलीयते। अत्र नायिकाया विरहासहत्वातिशयप्रकटनाय संतापवत्कार्याणि मृणालमालिन्यादीन्यपि वर्णनीयत्वेन विवक्षितानीति तन्मुखेन संतापोवगम्यः। अत्र कार्यमुखेन कारणस्यावगतिरपि निबद्धा। न तत्रायमलंकारः किंत्वनुमानमेव। यथा। परिम्लानं पीनस्तनजघनसंगादुभयतस्तनोर्मध्यस्यांतः परिमिलनमप्राप्य हरितम्। इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशांग्याः संतापं वदति नलिनीपत्रशयनम्॥ ननु प्रस्तुतकार्यनिधानमुखेन कारणस्य गम्यत्वमपि प्रस्तुतांकुरश्च। किं न हि पर्यायोक्तमित्याकांक्षायामाह। पर्यायोक्तं तु गम्यस्य वचो भंग्यंतराश्रयम्। नमस्तस्मै कृतो येन मुधा राहुवधूकुचौ। यदेव गम्यं विवक्षितं तस्यैव भंग्यंतरेण विवक्षितरूपादपि चारुतरस्वरूपेण केनचिद्रूपांतरेणाभिधानं पर्यायोक्तं। उत्तरार्धमुदाहरणं। अत्र भगवान्वासुदेवः स्वासाधारणरूपेण गम्यः। राहुवधूकुचवैयर्थ्यकारकत्वेन रूपांतरेण स एवाभिहितः। यथा वा। लोकं पश्यति यस्यांघ्रिः स यस्यांघ्रिं न पश्यति। ताभ्यामप्यपरिच्छेद्या विद्या विश्वगुरोस्तव। अत्र गोतमः पतंजलिश्च स्वासाधारणरूपाभ्यां गम्यौ रूपांतरेणाभिहितौ। यथा वा। निवेद्यतां हंत समापयंतौ शिरीषकोषम्रदिमाभिमानं। पादौ कियद्दूरमिमौ प्रयासे विधित्सते तुच्छदयं मनस्ते॥

अत्र किं यद्दूरं जिगमिषति गम्य एवार्थो रूपांतरेणाभिहितः। यथा देवं वंदे जलधिःशरधिं देवतासार्वभौमं
सप्रतिष्ठा भुवनविदिता यस्य वाहादिवाहाः। भूषापेटी भवनमधरं पुष्करं पुष्पवाटी शाटीपालाः शतमु
खमुखाश्चंदनद्रुर्मनोभूः। अत्र यस्य वेदा वाहा भुजंगमा भूषणानि सोदस्तत्तद्वाक्यार्थस्य व्यवस्थितौ
घा४ वेदत्वाँकारेण नाभिहिताः। किंतु वेदव्यासप्रमुखमुनिनेत्याद्याकारेणाभिहिता। परंतु देवतासार्वभौ
मत्वस्फुटीकरणाय विशेषणविशेष्यभावो व्यत्यासेन प्रतिपादितः। अलंकारसर्वस्वकृतापि पर्यायोक्तस्य
संप्रदायागतमिदमेव लक्षणमंगीकृतं। गम्यस्यैव भंग्यंतरेणाभिधानं पर्यायोक्तमिति। चक्राभिधान
प्रसभाज्ञयैव चकार यो राहुवधूजनस्य। आलिंगनोद्दामविलासवंध्यं रतोत्सवं चुंबनमात्रशेषमि
ति प्राचीनं तदुदाहरणं। कथमन्यथा योजनीयमिति राहुवधुगतेनाविशिष्टेन रतोत्सवेन राहुशिरश्छे
दकरणरूपो गम्यत इति। एवं च गम्यस्यैवाभिधानमिति लक्षणमिदं क्लिष्टगत्या योजितं। लोचनकृता
पि पर्यायोक्तौ यदन्येन प्रकारेणाभिधीयते। इति इदमेव लक्षणमंगीकृत्य तदुदाहरणे चकार्येणशब्दा
भिहितेन कारणं व्यंग्यं सम्यक्प्रदर्श्यते तत्र लक्षणलक्ष्याणां च नाम क्लिष्टगत्या योजितं। वाच्यादन्ये
न प्रकारेण व्यंग्येनोपलक्षितं सम्यगभिधीयते तत्प्रकारेण पर्यायेण प्रकारांतरेण व्यंग्येनोपल
क्षितमुक्तमिति। सर्वोयं क्लेशः किमर्थमिति न विद्मः। दर्शितानि हि गम्यस्यैव रूपांतरेणाभिधा
ने बहून्युदाहरणानि। चक्राभिधानप्रसभाज्ञयैवेति प्राचीनोदाहरणमपि स्वरूपेण गम्यस्य
भगवतो रूपांतरेणाभिधानसंभवात्सुयोजमेव। यत्तु राहुशिरश्छेदावगमनं तत्र प्रागुक्त

रीत्याप्रस्तुतांकुरएव प्रस्तुते नराहोः शिरोमात्रावशेषेण लिंगनवंध्यत्वाद्यापादनरूपे वाच्ये भगवतारूपांतरे उपपादिते तेन भगवद्रूपेणावगमनं पर्यायोक्तस्य विषयः। पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनं। यामि चूतलतां दृष्ट्वा युवाभ्यामास्यतामिह। अत्र नायिकां नायकेन संगमय्य चूतलतादर्शनव्याजेन निर्गच्छंत्यास्सख्यास्ततः स्वाछंदसंपादनरूपेष्टसाधनं पर्यायोक्तं। यथावा। देहि मत्कंदुकं राधे परिधाननिगूहितं। इति विस्रंयन्नीवीं तस्याः कृष्णो मुदेस्तु वः। सर्वत्र परेष्टसाधनं। अत्र कंदुकसद्भावशोधनार्थं नीवीविस्रंसनव्याजेन स्वेष्टसाधनमिति भेदः। उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिंदयोः। कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवं। साधुदूति पुनः साधु कर्त्तव्यं किमतः परं। यन्मदर्थे विलूनासि दंतैरपि नखैरपि। निंदयास्तुतेः स्तुत्या निंदाया वा अवगमनं व्याजस्तुतिः। कः स्वर्धुनीत्युदाहरणे विवेको नास्तीति निंदाव्याजेन गंगा सुकृतिवदेव पापिनोपि स्वर्गं नयतीति व्याजरूपया निंदया तस्तिभावातिशयस्तुतिः। साधुदूतीत्युदाहरणे मदर्थमियंतं क्लेशमनुभूतमसीति व्याजरूपयास्तुत्या मदर्थं न गतासि किंतु रंतुमेव गतासि धिक्त्वां दूतिका धर्मविरुद्धकारिणीमिति निंदावगम्यते। यथावा। कस्ते शौर्यमहो युद्धे त्वय्येकं सप्तिमास्थिते। सप्तसप्तिसमारूढा भवंति परिपंथिनः। अर्द्धं दानववैरिणा गिरिजयाप्यर्द्धं शिवस्याहृतं देवेत्थं जगतीतले स्मरहराभावे समुन्मीलति। गंगा सागरमंबरं शशिकला नागाधिपः

क्ष्मातलं सर्वज्ञत्वमपीश्वरत्वमगमस्त्वं मां न भिक्षाटनं। अत्राद्योदाहरणे सप्तसप्तिपदगतश्लेषमू
लनिंदाव्याजेन स्तुतिर्गम्यते। द्वितीयोदाहरणे सर्वज्ञः सर्वेश्वरोसीति राज्ञः स्तुत्या व्याजरूपया मद
यैवेदृष्याद्रिदारिद्र्यादि सर्वं जानन्नपि बहुप्रदानेन न रक्षितुं शक्तोपि मह्यं किमपि न ददासीति निंदाव्य
ज्यते। सर्वमिदं निंदास्तुत्योरेकविषयत्वेनोदाहरणं। भिन्नविषयत्वेन निंदया स्तुत्यभिव्यक्तिर्यथा।
कस्त्वं वानर रामराजभवने लेखार्थसंवाहको यातः कुत्र पुरागतः स हनुमान्निर्दग्धलंकापुरः। ब
द्धो राक्षससूनुनेति कपिभिः संताडितस्तर्जितः सव्रीडात्तपरीभवो वनमृगः कुत्रेति न ज्ञायते।
अत्र हनुमन्निंदयेतरवानरस्तुत्यभिव्यक्तिः। स्तुत्या निंदाभिव्यक्तिर्यथा। यद्वक्त्रं मुहुरीक्षसे न धनि
नां ब्रूषे न चाटून्मृषा नैषां गर्ववचः शृणोषि न च तान्प्रत्याशया धावसि। काले बालतृणानि खादसि
परं निद्रासि निद्रागमे तन्मे ब्रूहि कुरंग कुत्र भवता किं नाम तप्तं तपः। अत्र हरिणस्तुत्या राजसेवा
निर्विण्णस्यात्मनो निंदा व्यज्यते। अयमप्रस्तुतप्रशंसाविशेष इलंकारसर्वस्वकारः। तेन हि सारू
प्यनिबंधनाप्रस्तुतप्रशंसोदाहरणानंतरं वैधर्म्येणादृश्यते। यथा वा। धन्याः खलु वने वाताः कह्ला
रसुखशीतलाः। राममिंदीवरश्यामं ये स्पृशंत्यनिवारिताः। अत्र वाता धन्या इत्यप्रस्तुतार्थोदाह
म धन्या इति वैधर्म्येण प्रस्तुतोर्थः प्रतीयत इति व्युत्पादितं। इयमेवाप्रस्तुतप्रशंसा न कार्यकारणा
दिनिबंधनेति दंडी। अप्रस्तुतप्रशंसा स्याद्प्रकांडे तु या स्तुतिः। सुखं जीवंति हरिणा वनेष्व

परसेविनः। अर्थैरयत्नसुलभैर्जलदर्भांकुरादिभिः। सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते। रा
जानुवर्त्तनक्लेशान्निर्विण्णेन मनस्विनेति। वस्तुतस्त्वत्र व्याजस्तुतिरित्येवयुक्तं। स्तुत्या निंदाभिव्य
क्तिरित्यप्रस्तुतप्रशंसातो वैचित्र्यविषयविशेषसद्भावात्। अन्यथा प्रसिद्धव्याजस्तुत्युदाहरणेष्वप्र
स्तुताभ्यां प्रस्तुते स्तुतिनिंदे गम्येते इत्येतावता व्याजस्तुतिमात्रमप्रस्तुतप्रशंसा स्यात्। एवं चान
याप्रक्रियया यन्नात्रागतस्तुतिविवक्षयान्यस्य स्तुतिः क्रियते। तत्रापि व्याजस्तुतिरेवान्यस्तुति
व्याजेन तदन्यस्तुतिरिति अर्थावगमसद्भावात्। यथा वा। शिखरिणि तव नामा कियच्चिरं किम
भिधानमसावकरोत्तपः। तरुणि येन तवाधरपाटलं दशति बिंबफलं शुकशावकः। अत्र शुक
शावकस्तुत्या नायिकाधरसौभाग्यातिशयस्तुतिर्व्यज्यते। निंदया निंदाव्यक्तिर्व्याजनिंदेति गी
यते। विधे स निंद्यो यस्ते प्रागेक एवाहरच्छिरः। अत्र हरनिंदया विषमविपाकं संसारं प्रवर्त्तयतो
विधेर्निंदाभिव्यंग्या व्याजनिंदा। यथा वा। विधिरेव विशेषगर्हणीयः करट त्वं रटकस्तवापराधः।
सहकारतरौ चकार योसौ हवासं सरलेन कोकिलेन। अन्यस्तुत्या अन्यस्तुत्यभिव्यक्तिरिति पं
चमप्रकारं व्याजस्तुतिप्रतिबंदीभूतयं व्याजनिंदा। ननु यत्रान्यस्तुत्यान्यस्तुतिरन्यनिंदयान्य
निंदा च प्रतीयते तत्र व्याजस्तुतिनिंदालंकारयोरभ्युपगमे स्तुतिनिंदारूपाप्रस्तुतप्रशंसोदा
हरणेष्वप्रस्तुतप्रशंसा न वक्तव्या। तेषामपि व्याजस्तुतिनिंदाभ्यां क्रोडीकारसंभवादिति चेत्। उ

च्यते। यत्र प्रस्तुतवृत्तांता स्तुतिनिंदारूपा तत्स्वरूपः प्रस्तुतवृत्तांतः प्रतीयते। अंतश्छिद्राणि भूयां
सि कंटका बहवो बहिः इत्यादौ तत्र। लब्धावकाशा सारूप्यनिबंधनाप्रस्तुतप्रशंसा। तान्यत्रापि प्र
वर्त्तमानानि निवर्त्तयितुं शक्या अन्यस्तुत्यान्यस्तुतिरन्यनिंदयान्यनिंदेत्येवं व्याजस्तुतिनिंदे अपि
संभवतश्चेत्कामं तेऽपि संभवेतां न तु तस्याः परित्यागः। यद्यपि विधिरेव विशेषगर्हणीय इति श्लोके
विधिनिंदया तन्मूलककाकनिंदया च विशेषज्ञस्य प्रभोस्तत्र न च विद्वत्समयतया स्थापितस्य मूर्ख
स्य च निंदापि प्रतीयते इति सारूप्यनिबंधनाप्रस्तुतप्रशंसाप्यस्ति तथापि सैवं निंदामूलेति प्र व्याज
थमापस्थितापि साधुवीरा। एवं च व्याजनिंदामूलका व्याजनिंदारूपेयमप्रस्तुतप्रशंसेति चमत्का
रातिशयः। एवमेव व्याजस्तुतिमूलकव्याजस्तुतिरूपाप्यप्रस्तुतप्रशंसा दृश्यते। यथा वा।
लावण्यद्रविणव्ययो न गणितः क्लेशो महानर्जितः स्वच्छंदं चरतो जनस्य हृदये चिंताज्वरो निर्मितः। एषा
पि स्वगुणानुरूपरमणाभावाद्वराकी हता कोऽर्थश्चेतसि वेधसा विनिहितस्तन्वीमिमां तन्वता॥ अत्र प्रस्तु
तायास्तरुण्याः सृष्टिनिंदाव्याजेन तन्निंदाव्याजेन च तत्सौंदर्यप्रशंसनीयत्वेन कविविवक्षितायाः स्वक
वितायाः शब्दार्थचमत्कारातिशयप्रशंसायां पर्यवस्यति। अस्य श्लोकस्य वाच्यार्थविषये यद्यपि नात्यंतसा
मंजस्यं नहीमे विकल्पाः वीतरागस्येति कल्पयितुं शक्यं तेदसाननुगुणत्वात् वीतरागहृदयस्य। एवं
विधविषयेष्वप्रवृत्तेश्च। नापि रागिण इति युज्यते तदीयविकल्पेषु वराकीति कृपणतालिंगितस्य हतेत्य
मंगलोपहितस्य च वचसोऽनुचितत्वात्। तुल्यरमणाभावादिसम्यासतमनुचितत्वाच्च। स्वात्मनि

तदनुरूपसंभाव। नायामपि विरागत्वे हि पशुप्रायतास्यात्। तथापि विवक्षितार्थे प्रस्तुतार्थपरतायां किंचिदसैमंजस्यं। अतएवास्य श्लोकस्याप्रस्तुतप्रशंसापरत्वमुक्तं प्राचीनैः वाच्यासंभवेप्यप्रस्तुतप्रशंसोपपत्तैरिति च। अथाक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्। चंद्रसंदर्शयात्मानमथवास्ति प्रियामुखं। अत्र प्रार्थितस्य चंद्रस्य प्रियमुखत्वेन कैमर्थ्यं विचार्य अथवेत्यादिसूचितः प्रतिषेध आक्षेपः। यथा। साहित्यपाथोनिधिमंथनोत्थं कर्णामृतं रक्षत हे कवींद्राः। यत्तस्य दैत्या इव लुंठनाय काव्यार्थचौराः प्रगुणीभवंति। गृह्णंतु सर्वे यदि वा यथेछं नास्ति क्षतिः क्वापि कवीश्वराणां। रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिंधुः। अत्रापि प्रथमश्लोकेन प्रार्थितस्य काव्यार्थचौरात्तया रक्षणस्य स्वोक्तिवैचित्र्याणां समुद्रगतरत्नजलवदक्षयत्वं विभाव्य प्रतिषेध आक्षेपः। निषेधाभासमाक्षेपं बुधाः केचन मन्वते॥ नाहं दूती तनोस्तापस्तस्याः कालानलोपमः। केचिदलंकारसर्वस्वकारादयस्त्वथमाहुः निषेधमात्रमाक्षेपः किंतु यो निषेधो बाधितः सन्नर्थांतरपर्यवसितः किंचिद्विशेषमाक्षिपति स आक्षेपः। यथा। दूत्या उक्तौ नाहं दूतीति निषेधो बाधितत्वादाभासरूपः सन् घटनकालोचितकैतववचनपरिहारेण यथार्थवादित्वे पर्यवस्यन्निदमेवावगत्य नायिकाजीवनीयेति विशेषमाक्षिपति। यथा वा। नरेंद्रमौले न वयं राजसंदेशहारिणः। जगत्कुटुंबिनस्तव न शत्रुः कश्चिदिष्यते। अत्र संदेशहारिणा मुक्तो न वयं संदेशहारिण इति निषेधोनुपपन्नः संधिकालोचितकैतववचनपरिहारेण

हारे

यथार्थवादित्वेपर्यवस्यसर्वजगतीपालकस्य तव कश्चिदपिशत्रुभावेनावलोकनीयः।। किंतुसर्वेपिराजानो
ऽरक्ष्यभावेनसंरक्षणीया इति विशेषमाक्षिपति। आक्षेपोन्योविधौयुक्ते निषेधे च तिरोहिते। गच्छगच्छसि
चेत्कांत तत्रैवस्याज्जनिर्मम। अत्रगच्छेतिविधिर्व्यक्तः मागा इति निषेधस्तिरोहितः कांतोद्देश्यदेशेनि
जजन्मप्रार्थनयास्वस्यामरणसंसूचनेनगर्भितः। यथावा। नचिरंममतापायतवयात्राभविष्यति।
यदियास्यसियातव्यमलमाशंकयापिते। अत्रापिनचिरंममतापायेतिस्वस्यामरणसूचनेनगमननि
षेधोगर्भितः। आभासत्वेविरोधस्यविरोधाभासइष्यते। विनापितन्विहारेणवक्षोजौतवहारिणौ। अत्र
हाररहितावपिहारिणौहृद्याविति श्लेषमूलको विरोधाभासः। यथावा। प्रतीपभूपैरिवकिंततोभियाविरु
द्धधर्मैरपिभेतृतोज्झिता। अमित्रजिन्मित्रजिदोजसासयद्विचारदृक्चारदृगप्यवर्त्तत। अत्रविरोधसमा
धानास्त्रेक्षाश्लिरस्कोविरोधाभासइति पूर्वस्माद्भेदः। विभावनाविनापिस्यात्कारणं कार्यजन्मचेत्। अप्य
लाक्षारसासिक्तं रक्तं तवचरणद्वयं। अत्रलाक्षारसासेककारणाभावेपिरक्तिमाकथितः स्वाभाविक
त्वेनविरोधपरिहारः। यथावा। आपीतक्षीबकादंबमसंसृष्टामलांबरं। अप्रसादितसूक्ष्मांबुजग
दासीन्मनोहरं। अत्रपानादिप्रसिद्धहेत्वभावेपिक्षीबत्वादिनिबद्धं विभाव्यमानशरत्समयहेतुकत्वेन
विरोधपरिहारः। यथावा। वरतनुकबरीविधायिनासुरभिनखेननरेंद्रपाणिना। अपचितकुसुमापि
वल्लरी समजनिवृंतनिलीनषट्पदा। वल्लर्यां पुष्पाभावेपिभृंगालिंगनंनिबद्धं। अत्रचवरतनुक
बरीसंक्रांतसौरभनरपतिनखसंसर्गरूपं हेत्वंतरं विशेषणमुखेन दर्शितमितिविरोधपरिहारः।।

हेतूनामसग्यत्वे[illegible]कार्योत्पत्तिश्च सामता। अस्त्रैरतीक्ष्णकठिणैर्जगज्जयति मन्मथः। अत्र जगज्जये साध्ये हेतूनामस्त्राणामसमग्रत्वं तीक्ष्णत्वादिगुणवैकल्यं। यथावा। उद्यानमारुतोद्धूतचूतचंपकरेणवः। उद[illegible]स्त्रयंति पांथानामस्पृशंतोपि लोचने। अत्र बाष्पोद्गमने हेतूनां रेणूनामसमग्रत्वं स्पर्शनक्रियावैकल्यं। इयं विशेषोक्तिरिति दंडी व्याजहार। यतः प्रथमोदाहरणे मन्मथस्य महिमातिशयरूपो द्वितीयोदाहरणे चंपकरेणूनामुद्दीपकत्वातिशयरूपश्च विशेषः ख्यापित इति। अस्माभिस्तु तीक्ष्णत्वादिवैकल्यमपि कारणविशेषसारूप्यमिति विभावना दर्शिता। कार्योत्पत्तिस्तृतीयास्यात्सत्यपि प्रतिबंधके। नरेंद्रानेव ते राजन्दशत्यसिभुजंगमः। खड्गलक्षणो भुजंगमः। अत्र नरेंद्रा विषवैद्याः सर्पदंशप्रतिबंधकमंत्रौषधीशालिनः श्लेषेण गृहीता इति सत्येव प्रतिबंधके कार्योत्पत्तिः। यथावा। नित्यं तपति राजेंद्र प्रतापपवनस्तव। अनातपत्रमुत्सृज्य सातिपत्रं द्विषद्गणम्। अकारणात्कार्यजन्म चतुर्थी स्याद्विभावना। शंखाद्वीणानिनादोयमुदेति महदद्भुतं। तत्र शंखत्वेन कामिनीकंठः तंत्रीनादत्वेन त[illegible]तमध्यवसीयत इत्यकारणात्कार्यजन्म। विरुद्धात्कार्यसंपत्तिर्दृष्टा काचिद्विभावना। शीतांशुकिरणास्तन्विं हंत संतापयंति मां। अत्र तापनिवर्तकतया तापविरुद्धैरिंदुकिरणैस्तापजनिरुक्ता। यथावा। उदिते कुमारसूर्ये कुवलयमुल्लसति भाति नक्षत्रं। मुकुलीभवंति वित्रं परराजकुमारपाणिपद्मानि। यथावा। अविवेकिकुचद्वंद्वं हंतु नाम जगत्त्रयं। श्रुतिप्रणयिनो

रक्ष्णोरयुक्तंजनमारणं। पूर्वोदाहरणयोः कार्यकारणविरोधित्वं स्वाभाविकं हेतुश्रुतिप्रणयित्वस्वरूपाग
तुकगुणप्रयुक्तमिति भेदः। कार्यात्कारणजन्मापि दृष्टा काचिद्विभावना। यथाः पयोधिरभवत्करकल्प
तरोरिव। यथावा। जाता लता हि शैले जातु लतायां न जायते शैलः। संप्रति तद्विपरीतं कनकलतायां गि
रिद्वयं जातं। कार्याज्जनिर्विशेषोक्तिः सति पुष्कलकारणे। हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि। य
थावा। अनुरागवती संध्या दिवसःस्यात्पुरःसरः। अहो दैवगतिश्चित्रा तथापि न समागमः। असंभवो
र्थनिष्पत्तेरसंभाव्यत्ववर्णनं। कोवेद गोपशिशुकः शैलमुत्पाटयेदिति। यथावा। अयं वारामेको नि
लय इति रत्नाकर इति श्रितोस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः। क एवं जानीते निजकरपुटी
कोटरगतं क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः। [illegible]न्नदेशत्वं कार्यहेत्वोरसंगतिः।
विषं जलधरैः पीतं मूर्छिताः पथिकांगनाः। ययोः कार्यहेत्वोर्भिन्नदेशत्वं [illegible] विरुद्धत्वयोस्त
न्निबध्यमानेऽसंगत्यलंकारः। यथावा। अहो खलभुजंगस्य विपरीतो वधक्रमः। अन्यस्य दश
ति श्रोत्रमन्यः प्राणैर्वियुज्यते। क्वचिदसांगत्यसमाधाननिबंधनेन चारुतातिशयः। यथा। अजस्र
मारोहसि दूरदीर्घां संकल्पसोपानततिं तदीयां। श्वासान्सवर्षत्यधिकं पुनर्यद्ध्यानात्तव त्वन्मयताम
वाप्य। विरुद्धमिति विशेषणाद्यत्र कार्यहेत्वोर्भिन्नदेशत्वं न विरुद्धं तत्र नासंगतिः। यथावा। भ्रू
चापवल्ली सुमुखी यावन्नयति वक्रतां। तावत्कटाक्षविशिखैर्भिद्यते हृदयं मम। अन्यत्र करणीय
स्य ततोन्यत्र कृतिश्च सा। अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तथा। अपरिजातां वसुधां चि

कीर्षयां तयारूथ्याः। गोत्रोद्धारप्रवृत्तोपि गोत्रोद्वेदं पुराकरोः। अत्र कृत्स्नप्रतिशाक्रस्योपालंभवचने
[illegible]भु। विचिकीर्षिततयातत्रकरणीयमपारिजातत्वांदिविकृतमिसेकासंगतिः। पुरागोत्रायाउ
द्धारप्रवृत्तेनवराहरूपिणानविरुद्धंगोत्राणांदलनंखुरकुट्टनैःकृतमितिद्वितीयाश्लेषोप्यर्पिता।
रव यथावा। त्वंद्गखंडितसपत्नविलासिनीनांभूषाभवंत्यभिनवाभुवनैकवीर। नेत्रेषुकंकणमथोरु
षुपत्रवल्लीचोलेंद्रसिंहतिलकः करपल्लवेषु। मोहंजगत्त्रयभुवामपनेतुमेतदादायरूपमखि
लेश्वरदेहभाजां। निःसीमकांतिरसनीरधिनामुनेवमोहंप्रवर्धयसिमुग्धविलासिनीनां॥ अत्रा
द्योदाहरणेकंकणादीनामन्यत्रकरणीयत्वंनप्रसिद्धमितिनोपन्यस्तंभवतिनाभावनारू
पान्यत्रकृतिराक्षिप्यतइतिलक्षणानुगतिः॥ विषमंवर्ण्यतेयत्रघटनाननुरूपयोः।
क्वेयंशिरीषमृद्वंगीक्वतावन्मदनज्वरः। अत्रातिमृदुत्वेनातिदुःसहत्वेनवाननुरूपयो
रंगनाममदनज्वरयोर्घटना। यथावा। अभिलषसियदींदोवक्त्रलक्ष्मींमृगाक्ष्याःपुन
ब्धौ रपिसकृदब्धौमज्जसंक्षाल्यांकं। सुविमलमथबिंबंपारिजातप्रसूनैःसुरभयव
दनोचेत्त्वंकुतस्त्यामुखंच॥ सर्वत्रवस्तुसतीघटना अत्रचंद्रवदनलक्ष्म्योस्ताद्रि
याघटनेतिभेदः। विरूपकार्यस्योत्पत्तिरपरंविषमंमतं॥ कीर्तिंप्रसूतेधव
लांश्यामातवकृपाणिका॥ अत्रकारणगुणप्रक्रमेणविरुद्धाच्छ्यामाद्धव
लोत्पत्तिः॥ कार्यकारणयोर्निर्वर्त्यनिर्वर्तकत्वेपंचमीविभावना॥ विलक्ष
णगुणशालित्वेप्ययंविषमइतिभेदः॥ अनिष्टस्याप्यवाप्तिश्चतदिष्टा

समुद्यमात्। भक्ष्याशया हि मंजूषां दृष्ट्वाखुस्तेन भक्षितः। इष्टार्थमुद्दिश्य किंचित्कर्मारब्धवतः ततो न केव
लमिष्टस्यानवाप्तिः। किंतु तत एवानिष्टस्यापि प्रतिलंभश्चेत्तदपि विषमं यथा। भक्ष्यप्रेक्षया सर्पपे
टिकां दृष्ट्वा प्रविष्टस्य मूषकस्य न केवलं भक्ष्यालाभः किंतु स्वरूपहानिरपीति। यथा वा। गोपाल इति
कृष्ण त्वं प्रचुरक्षीरवांछया। श्रितामातस्तनक्षीरमप्यलभ्यं लयावृतं। इदमर्थावाप्तिरूपेष्टार्थस
मुद्यमादिष्टानवाप्तावनिष्टप्रतिलंभे चोदाहरणं॥ अनर्थपरिहाररूपेष्टार्थसमुद्यमात्तदुभयं यथा॥
हिविश्रितवतश्चंद्रं सैंहिकेयभयाद्भुवि। शशास्य पश्यत त्वं गिसाश्रयस्य ततो भयं। अत्र न केवलं श
शस्य स्वानर्थपरिहारानवाप्तिः किंतु स्वाश्रयस्यापि अनर्थावाप्तिः इति दर्शितं। परानिष्टावाप्तिरूपेष्टा
र्थसमुद्यमात्तदुभयं यथा। दिधक्षन्मारुतेर्वालं तमादीप्य दशाननः। आत्मीयस्य पुरस्यैव सद्यो
दहनमन्वभूत्। पुरस्यैवेत्येवकारेण परानिष्टप्रापणाभावाद्दर्शितः। अनिष्टस्याप्यवाप्तिश्चेति
श्लोके अनिष्टावाप्तिः अपिशब्दसंगृहीततया इष्टानवाप्तिः प्रत्येकमपि विषमपदेनान्वेति। तत
श्चैकेवलानिष्टप्रतिलंभः। केवलेष्टानवाप्तिश्चेदन्यदपि विषमद्वयं लक्षितं भवति। तत्र केव
लानिष्टप्रतिलंभो यथा। पभातपत्ररसिके सरसीरुहस्य किंकेदर्पयितुमिच्छसि वापिकायां।
कालः कलिर्जगदिदं न कृतज्ञमज्ञे स्थित्वा हरिष्यति तवैव मुखस्य लक्ष्मीं॥ अत्र पद्मा

अत्रपद्मातपत्रलिप्सयापद्मबीजावापंकृतवत्यास्तल्लोभोस्त्येव। किंतुमुखशोभाहरणरूपानिष्ट
प्रतिलंभः केवलेष्टानवाप्तिर्यथा। खिन्नोसिमुंचशैलंबिभृमोवयमितिवदत्सुशिथिलभुजः। भर
भुग्नविततबाहुषुगोपेषुहसन्हरिर्जयति। अत्रयद्यपिशैलस्यउपरिपतनरूपानिष्टावाप्तिरपि
प्रसक्ता। तथापिभगवत्करांबुजसंस्पर्शमहिम्नासातत्रनजातेतिशैलधारणरूपेष्टानवाप्तिमात्रं।
लोकेकलंकमपहातुमयंमृगांकोजातोमुखंतवपुनस्तिलकछलेन्। तत्रापिकल्पयसितन्विकलंक
रेखांनार्याःसमाश्रितजनंहिकलंकयंति। अत्रानर्थपरिहाररूपेष्टानवाप्तिः। यथावा। शापोप्य
दृष्टतनयाननपद्मशोभेसानुग्रहोभगवतामयिपातितोयं। कृष्यांदहन्नपिखलुक्षितिमिंधनेद्धो
बीजप्ररोहजननींज्वलनःकरोति। अत्रपरानिष्टप्रापणरूपेष्टानवाप्तिः स्वतोनिष्टस्यापिमुनिशाप
स्यमहापुरुषार्थपुत्रलाभावश्यंभावगर्भतयादशरथेनेष्टत्वेनस्वीकृतत्वात्। तत्रकेनचित्स्वेष्टसिध्य
र्थंप्रेषितेनान्येननियोक्तुरिष्टमनपेक्ष्यस्वस्यैवेष्टंसाध्यतेतत्रापिइष्टानवाप्तिरूपमेवविषमंयथा।
नपुंसकमितिज्ञात्वातांप्रियायैप्रेषितंमनः। तत्तुतत्रैवरमतेहताःपाणिनिनावयं। एतानिसर्वथैव
इष्टानवाप्त्युदाहरणानि। किंचिदिष्टावाप्तिपूर्वकंतदनवाप्तिर्यथा। मदीयवरदराजस्तवे॥ भानुर्निशासु
भवदंघ्रिमयूखशोभालोभात्सताप्यकरणाकरमाप्रभातं। तत्रोद्धृतेकृतवहात्क्षणलग्नरागेतापभृज्ज
सन्ननुदिनंसहिमंदतापः। यथावा। लब्धुंश्रीकांतिमयमंबुजकोशमुद्राभंगात्ततःकुसुममित्रकराप

कृष्ट्या। लब्ध्वापि पार्वणविधुः क्रमह्रीयमानः शंसत्यनीलमुपचितां श्रियमाशुनाशं। अत्राद्यश्लोके सूर्य
किरणानां रात्रिष्वग्नौ प्रवेशनमागमसिद्धं सूर्यस्य निजकिरणेषु भवतश्चरणारुणिमप्रसयातैर्लूत
तेषामग्नौ प्रतापं परिकल्प्य तेषां उदयकालदृश्यमरुणिमानं च तत्प्रोद्धृतनाराचानामिव। अग्निसंताप
नप्रयुक्तारुणिमानुवृत्तिं परिकल्प्यास्य महतापि यत्नेन तात्कालिकेष्टावाप्तिरेव जायते न सार्वकालि
केष्टावाप्तिरिति दर्शितं। द्वितीयश्लोके चंद्रस्य भगवन्मुखलक्ष्मीमीप्समानस्य सुतल्लेखनमित्रशब्द
श्लेषवशात् सूर्यं परिकल्प्य तत्किरणस्य कमलमुकुलविकासकस्य चंद्रप्रसारणार्थं चंद्रानुप्रवेशं वसु
हसाणे भगवन्मुखलक्ष्मीनिधानगृहकोशमुद्रामोचनं पूर्वं कृततोगृहीतभगवन्मुखचंद्रस्य रूपं च
परिकल्प्यते। एतावतापि प्रयत्नेन पौर्णमास्यामेव भगवन्मुखसाम्यरूपेष्टावाप्तिर्जायते न सार्वकालिकी
ति दर्शितं। क्वचिद्दृष्टान्तवाक्याभावेपि तद्वाप्तिभ्रमनिबंधनविच्छित्तिविशेषो यथा। वल्लालक्षोणिपाल त्वद
हितनगरं संचरंती किराती कीर्णान्यादाय रत्नान्युरुतरखदिरांगारशंकाकुलांगी॥ क्षिप्त्वा श्रीखंडखं
ड तदुपरि मुकुलीभूतनेत्रा धमंती श्वासामोदप्रसक्तैर्मधुकरपटलैर्धूमशंकां करोति। अत्र प्रस्तुताग्नि
संपादनोद्योगात् तत्संपादनालाभेपि तल्लाभभ्रमोपन्यासेनानिबद्धः॥ समं स्याद्वर्णनं यत्र द्वयोरप्य
नुरूपयोः। स्वानुरूपकृतं सद्म हारेणकुचमंडलं। प्रथमविषमप्रतिद्वंद्वपदं समं। यथा वा। कौमुदीव
तुहिनांशुमंडलं जान्हवीव हरशिखंडमंडलं। पश्यकीर्त्तिरनुरूपमाश्रिता तावकी विभाति नरसिंहभूपते॥
चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं जातो दैवादुचितघटनासंविधाता विधाता। यन्निं

कुवलया

३९

वानांपरिणतफलास्फीतिरास्वादनीयायज्ञैतस्याः कबलनकलाकोविदः काकलोकः। पूर्वं स्तुतिपर्य
वसायीदं निंदापर्यवसायीति भेदः। सारूप्यमपि कार्यस्य कारणेन समं विदुः। नीचप्रवणता लु
'क्ष्मि जलजायास्तवोच्चिता। इदं द्वितीयं विषमप्रतिद्वंद्विसमं। यथावा। दवदहनादुत्पन्नो धूमो घ
नतामुपेत्य वर्षैस्तं। यच्छमयति तद्युक्तं सोपि च दवमेव विनिहंति। यथावा। आदौ हालाहलहु
तभुजा दत्तहस्तावलंबो बाल्येशंभोर्निटिलमहसा बद्धमैत्री निगूढः। ओढा राहोरपि मुखबिले विषे
रंतरंगीकृतोयं सोयं चंद्रस्तपति किरणैर्मामिति प्राप्तमेतत्। पूर्वत्र कारणस्वभावानुरूप्यं कार्य
स्य। अत्र त्वागंतुकतदीयदुष्टसंसर्गानुरूप्यमिति भेदः। विनानिष्टं च तत्सिद्धिर्यदर्थं कर्तुमु
द्यमः। युक्तो वारणलाभोयं स्यान्नते वारणार्थिनः। इदं सममनिष्टस्याप्यवाप्तिश्चेति अर्थ
संगृहीतस्य त्रिविधस्यापि विषमस्य प्रतिद्वंद्वि इष्टावाप्तेः अनिष्टस्याप्रसंगाच्च। अत्र गजा
र्थितया राजानमनुसरंतं दौवारिके वार्यमाणं प्रति नर्मवचनमुदाहरणं। न चात्र निवारणमनि
ष्टमापन्नमित्युदाहरणमाशंकनीयं। राजद्वारि क्षणं निवारणं संभावितमिति तदंगीकृत्य
प्रवृत्तस्य विषमालंकारोदाहरणेष्विव तर्कितोकल्पानिष्टापत्तिरभावात्। किंच यत्रोक्तानिष्ट
सत्त्वेपि श्लेषमहिम्ना इष्टार्थप्रतीतिस्तत्रापि समालंकारोप्रतिहत एव। यथावा। उच्चैर्गजै
रटनमर्थयमानवे त्वामाश्रयन्निह चिरादुषितोस्मि राजन्। उच्चाटनं त्वमपि लंभयसे तदेव मा
मद्य नैव विफला महतां हि सेवा। अत्र व्याजस्तुतौ यद्यपि स्तुत्या निंदाभिव्यक्तिर्विवक्षायां। विष

घ

एव

[illegible]

तथापिप्राथमिकस्तुतिरूपवाच्यकक्षायांसमालंकारोननिवार्यते। एवमिष्टार्थावाप्तिसत्वेप्यश्लेषवशाद्वस्
तुनिष्ठार्थप्रतीतिस्तत्रापिसमालंकारस्य[illegible]नक्षतिः। यथा। शास्त्रंनखलुकर्तव्यमितिपित्रासमीरितः।
तत्रैवशास्त्रंकृतवान्पितुराज्ञानलंघिता। अत्रपितुराज्ञानलं।ध्रुघितेत्यनेनविधालंकाराभिव्यक्तय
र्थंनखल्वित्यत्रपदद्वयविभागात्मकरूपांतरस्यापिविवक्षायाःसत्वेपिनखलुनातीतिनखल्वित्येक
पदत्वेनवस्तुसदृर्थांतररूपांतरमादायसमालंकारोप्यस्त्येव। श्लेषबलव्यासन्निकृष्टावाप्तिप्रतीतिमा
त्रेणापिगतमुदाहरणं। यथावा। सत्वंतपःसुगत्यैयत्तप्तांबुधुरविप्रतीक्षंनृसन्न अनुभवतिसुगति
मब्धांत्वसदपंसमस्तकमनीयं। [illegible]लसयत्लेऽविपरीतफलेच्छया। नमंतिसंतस्त्रैलोक्याद्पिलब्धुं
समुन्नतिम्। यथावा। मलिनय्यपिखलवदनंविमलयतिजगंतिदेवकीर्तिस्ते। मित्राह्लादंकर्तुमित्राय
दुःखयतिप्रतापोपि। अधिकंपृथुलाधारादाधेयाधिक्यवर्णनं। ब्रह्मांडानिजलेयत्रतत्रमांतिनतेगुणाः।
अत्रयत्रमहाजलौघस्थान्यनंतानिब्रह्मांडानिइत्याधारस्यातिविशालत्वंप्रदर्श्यनतत्रमांति
साधेयानांगुणानामाधिक्यंवर्णितं। यथावा। युगांतकालप्रतिसंहृतात्मनोजगंतियस्यांसविका
शमासत। तनौममुस्तत्रनकैटभद्विषस्तपोधनाभ्यागमसंभवामुदः। पृथ्वाधेयाद्यदाधारा
ब्रह्म धिक्यंतदपितन्मतं। कियद्वाग्ब्रह्मयत्रैतेविश्राम्यंतिगुणास्तव। अत्रएतदितिप्रत्यक्षदृष्टमहावैभव
त्वेनोक्तानांगुणानांविश्राम्यंतीत्यसंबाधावस्थानोक्त्या आधारस्यवाग्ब्रह्मणआधिक्यंव
र्णितम्। यथावा। अहोविशालंभूपालभुवनत्रितयोदरं। मातिमातुमशक्योपियशोराशिर्य
यदत्रते। अत्रउदाहरणद्वयेपिकियद्वाग्ब्रह्मअहोविशालमितिचाधारयोःप्रशंसैवेयततथापि

तनुत्वेनासिद्धवत्कृतयोः शब्दब्रह्मभुवनोदरयोः गुणायत्तोराशिप्रशंसायामेव पर्यवस्यति। अल्पं
तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता। मणिमालोर्मिका तेद्य करे जपमालायते। अत्र मणिमाला
मय्यूर्मिका तावदंगुलीमात्रपरिमितत्वात्सूक्ष्मा सापि विरहिण्याः करे कंकणवत्प्रवेशिता तस्या
जपमालायत इत्युक्त्या करस्य विरहकार्श्यादतिसूक्ष्मता दर्शिता। यन्मध्यदेशादपि ते सूक्ष्मं
लोलाक्षि दृश्यते। मृणालसूत्रमपि ते नैव माति स्तनांतरे। अन्योन्यं नाम यत्र स्यादुपकारः परस्परं।
त्रियामा शशिना भाति शशी भाति त्रियामया। यथा वा। यथोर्ध्वाक्षः पिबत्यंबु पथिको विरलांगुलिः।
तथा प्रपापालिकापि धारां वितनुते तनुं। अत्र यथा प्रपापालिकायाः पथिकेन स्वासक्त्या पानीय
दानव्याजेन बहुकालं स्वमुखावलोकनं अभिलषता विरलांगुलिकरणेन चिरं पानीयपानानु
वृत्तिसंपादनेनोपकारः कृतः। तथा प्रपापालिकयापि स्वमुखावेक्षिसंपादनेनोपकारः कृतः।
अत्रोभयोर्व्यापाराभ्यां स्वस्वोपकारसंभवेपि परस्परोपकारो न निवार्यते। विशेषः ख्यातमाधारं वि
नाप्याधेयवर्णनं। गतेपि सूर्ये स्थास्तमश्छिंदंति तत्कराः। यथा वा। कमलमनंभसि कम
ले कुवलयं तानि च कनकलतिकायां। सा च सुकुमारसुभगेत्युत्पातपरंपरा केयं। अत्राद्ये सूर्यस्य
प्रसिद्धाधारस्याभावेपि तत्कराणामन्यत्र स्थितिरुक्ता। द्वितीये सलिलस्य प्रसिद्धाधारस्याभावे
पि कमलकुवलययोरन्यत्रावस्थितिर्वर्णिता। क्वचित्प्रसिद्धाधाररहितानामाधारांतरनिर्देशं
विनैवाप्रलयावस्थितिवर्णनं दृश्यते। यथा। दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषां

जीवनमभिलषतः पथिकस्य धारानुकरणतश्चिरं पानीयदानानुवृ

त

दीप

रमयंति जगंति गिरः कथमिव कवयो न ते वंद्याः। अत्र कवीनामभावेपि तद्गिरामाधारं निर्देशं विनैवाक
ल्पमवस्थितिरुक्ता। विशेषः सोपि यदेकं वस्त्वनेकत्र वर्ण्यते। अंतर्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सैव
मे। यथावा। हृदयान्नापयातोसि दिक्षु सर्वासु दृश्यसे। वत्स राम गतोसीति संतापेनानुमीयसे॥
किंचिदारंभतोशक्यवस्त्वंतरकृतिश्च सः। त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणं। यथावा।
स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यं। विधिना ससृजे नवो मनोभूर्भुवि सत्यं स
विता बृहस्पतिश्च। अत्राद्ये राजदर्शनारंभेण कल्पवृक्षदर्शनरूपाशक्यवस्त्वंतरकृतिः। द्वितीये रा
जसृष्ट्यारंभेण मनोभवादिसृष्टिरूपाशक्या शक्यवस्त्वंतरकृतिः। स्याद्व्याघातोन्यथाकारित
थाकारि क्रियेत चेत्। यैर्जगत्प्रीयते हंति तैरेव कुसुमायुधः। यद्यत्साधनत्वेन लोकेनावगतं
तत्केनचिद्विरुद्धसाधनं क्रियेत चेत्स व्याघातः। यद्यत्साधनतया केनचिदुपात्तं तदन्येन तत्प्रति
द्वंद्विनाविरुद्धसाधनं क्रियेत चेत्सोपि व्याघातः। तत्राद्य उदाहृतः। द्वितीयो यथा। दृशा दग्धं म
नसिजं जीवयंति दृशैव याः। विरूपाक्षस्य जयिनीस्तास्स्तुवे वामलोचनाः॥ सौकर्येण निबद्धा
पि क्रिया कार्यविरोधिनी। दयाचेद्बाल इति मय्यपरित्याज्य एव ते। कार्यविशेषनिष्पादकतया
केनचित्संभाव्यमानादर्थादन्येन कार्यविरोधिना क्रियासौकर्येण समर्थ्यते चेत्सोपि [illegible]ाघातः।
कार्यविरुद्धक्रियायां सौकर्यकरणस्य स्फुटतरां तदानुगुण्यं। तथ[illegible]। जैत्रयात्रोत्सुखेन राज्ञायु

३३ वराजस्य राज्य एव स्थापनेयं कारणत्वेन संपादितं बाढं प्रसुहृदि रुद्धस्य सहनयनस्यैव कार
णतया युवराजेन परित्यागस्यायुक्तत्वं दर्श्यते॥ यथा वा॥ लुब्धो न विसृजत्यर्थं नरो दारिद्र्यशंकया।
दातापि विसृजत्यर्थं तयैव ननु शंकया॥ अत्र पूर्वार्द्धे पक्षप्रतिपक्षरूपयोर्वचनेन इति लक्षणानुगतिः।
गुंफः कारणमाला स्याद्यथा प्राक्प्रांतकारणैः॥ नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः॥ उत्त
रोत्तरकारणभूतपूर्वपूर्वैः पूर्वपूर्वकारणभूतोत्तरोत्तरैर्वा वस्तुभिः गुंफः कारणमाला। आद्यो
दाहृतः॥ द्वितीयो यथा॥ भवंति नरकाः पापात्पापं दारिद्र्यसंभवं॥ दारिद्र्यमप्रदानेन तस्माद्दानपरो भ
व। गृहीतमुक्तरीत्यार्थश्रेणिरेकावलिर्मता। नेत्रे कर्णांतविश्रांते कर्णौ दोःस्तंभदोलितौ। दोःस्तंभौ
जानुपर्यंतप्रलंबनमनोहरौ। जानुनी रत्नमुकुराकारे तस्य हि भूभुजः॥ उत्तरोत्तरस्य पूर्वपूर्
वविशेषणभावः पूर्वपूर्वस्योत्तरोत्तरविशेषणभावो [illegible] गृहीतमुक्तरीतिः॥ तत्राद्यः प्रकार उदाहृतः॥
द्वितीयो यथा॥ दिक्कालात्मसमैव यस्य विभुता यस्तत्र विद्योतते यत्रामुष्य सुधीभवंति किरणा रा
शेः स यासामभूत्। यस्तापित्तमुषः सुधास्य हविषे यस्तस्य जीवातवे वोढा यद्गुणमेव मन्मथ
रिपोः स्ताः पांतु वो मूर्तयः॥ दीपकैकावलीयोगान्मालादीपकमिष्यते। स्मरेण हृदये तस्या ३३
स्तेन त्वयि कृता स्थितिः। अत्र स्थितिरित्येकं पदं स्मरेण तस्याः हृदये स्थितिः कृता तेन
त्वयि स्थितिः कृतेत्येव वाक्यद्वयेऽन्वेति। अतो दीपकं। गृहीतमुक्तरीतिसद्भावादेकावली
चेति दीपकैकावलीयोगः। यथा वा। संग्रामांगणसंगतेन भवता चापे समारोपिते देवाकर्ण

येनयेनसहसायद्यत्समासादितं।कोदंडेनशराःशरैररिशिरस्तेनापिभूमंडलं तेनत्वंभवताचकी
र्त्तिरतुलाकीर्त्याचलोकत्रयं।अत्रयेनयेनसहसायद्यत्समासादितमितिसंक्षेपवाक्यस्थितमे
कंसमापरिणामेनान्वेतीतिदीपकं।शरादीनामुत्तरोत्तरंविशेषणभावादेकावलीचेतिदीपकैका
वलीयोगः।उत्तरोत्तरमुत्कर्षःसारइत्यभिधीयते।मधुरंमधुतस्माच्चसुधातस्याःकवेर्वचः॥
यथा।अंतर्विष्णोस्त्रिलोकीनिवसतिफणिनामीश्वरेसोपिशेतेसिंधोःसोप्येकदेशेतमपिचुलुकयां
कुंभयोनिश्चकार।धत्तेखद्योतलीलामयमपिनभसिश्रीनृसिंहक्षितींद्रत्वत्कीर्त्तेःकर्णनीलोत्पल
मिदमपिचप्रेक्षणीयंविभाति।अयंश्लाघ्यगुणोत्कर्षः।अश्लाघ्यगुणोत्कर्षोयथा।तृणाल्लघु
तरस्तूलस्तूलादपिचयाचकः।वायुनाकिंननीतोसौमामयंप्रार्थयेदिति।उभयरूपोयथा।
गिरिर्महान्गिरेरब्धिर्महानब्धेर्नभोमहत्।नभसोपिमहद्ब्रह्मततोप्याशामहीयसी।अत्रब्रह्म
पर्यंतंमहत्त्वंश्लाघ्यगुणःप्रकृतार्थेतुआशायांअश्लाघ्यगुणः।यथासंख्यंक्रमेणैवक्रमि
काणांसमन्वयः।शत्रुंमित्रंविपत्तिंचजयरंजयभंजय।यथावा।शरणंकिंप्रपन्नानिविष
वन्मारयंतिकिं।नत्यज्यंतेनभुज्यंतेकृपणेनधनानियत्।अमुंक्रमालंकारइतिकेचिद्व्यवजहुः।
पर्यायोयदिपर्यायेणैकस्यानेकसंश्रयः।पद्मंमुक्त्वागताचंद्रंकामिनीवदनप्रभा।अत्रैकस्याः
कामिनीवदनप्रभायाःक्रमेणपद्मचंद्ररूपानेकधासंश्रयेणपर्यायः।यद्यपिपद्मसंश्रयणं
कंठतोनोक्तंतथापिमुक्त्वेतिपरित्यागोक्त्याप्राक्संश्रयणाक्षेपेणापर्यायनिर्वाहः।अतएवश्रोणीबंध
स्त्यजतितनुतांसेवतेमध्यभागःप

श्रीरस्तु॥

द्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्यां। धत्ते वक्षः कुचसचिवतामद्वितीयं च वक्त्रं। त्वद्गा
त्राणां गुणविनिमयः कल्पितो यौवनेनेत्यत्र पर्यायं काव्यप्रकाशकार उदाजहार। सर्वत्र शाब्दः
पर्यायो यथा। नन्वाश्रयस्थितिरियं तव कालकूट केनोत्तरोत्तरविशिष्टपदोपदिष्टा। प्रागर्णि
वस्य हृदये वृषलक्ष्मणोथ कंठेधुना वससि वाचि पुनः खलानां। सर्वोप्ययं शुद्धपर्यायः। संकोचप
र्यायो यथा। प्रातश्चरित्वा वसुधामशेषां छायासु विश्रम्य ततस्तरूणां। प्रौढिंगते संप्रति चित्रभानौ
शैत्यं शनैरंतरपां बभूव। अत्र शैत्यस्योत्तरोत्तरमाधारसंकोचः पर्यायः। विकासपर्यायो यथा।
बिंबोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत। अधुना मृगशावाक्षि हृदयेप्येष दृश्यते। अत्र रागस्य पूर्वा
धारापरित्यागेनाधारांतरसंक्रमणमिति विकाशपर्यायः। एकस्मिन्नप्यनेकं वा पर्यायः
सोपि संमतः। अधुना पुलिनं तत्र यत्र स्रोतः पुराजनि। यथा वा। पुराभूदस्माकं प्रथमम
विभिन्ना तनुरियं ततो नूनं प्रेयान्वयमपि हताशाः प्रियतमाः। इदानीं नाथस्त्वं वयमपि क
लत्रं किमपरं हतानां प्राणानां कुलिशकठिनानां फलमिदम्। अत्र दंपत्योः प्रथममभेदः।
ततः प्रेयसीप्रियतमभावः। ततो भार्यापतिभाव इत्याधेयपर्यायः। परिवृत्तिर्विनिमयो
न्यूनाभ्यधिकयोर्मिथः। जग्राहैकं शरं मुक्त्वा कटाक्षात्स रिपुश्रियं। यथा वा। तस्य च प्रव
यसो जटायुषः स्वर्गिणः किमव शोच्यतेऽधुना। येन जर्जरकलेवरव्ययात्क्रीतमिंदुकिरणो ३४
ज्ज्वलं यशः। परिसंख्या निषिध्यैकमेकस्मिन्वस्तुयंत्रणं। स्नेहक्षयप्रदीपेषु न स्वांते नतभ्रुवां। पु

यथावा। विलंघयंतिश्रुतिवर्त्मयस्यांलीलावतीनांनयनोत्पलानि। बिभर्त्तियस्यामपिवक्रिमाण
मेकोमहाकालजटार्द्धचंद्रः। आद्योदाहरणेनिषेधःशाब्दः। द्वितीयेत्वार्थः। विरोधेतुल्यबलयो
र्विकल्पोलंकृतिर्मता। सद्यःशिरांसिचापान्वानमयंतिमहीभुजः। अत्रसंधिविग्रहप्रमाण
प्राप्तयोःशिरश्चापनमनयोर्युगपदुपस्थितयोःयुगपत्कर्त्तुमशक्ययोर्विकल्पः। बहूनांयु
गपद्भावभाजांगुंफःसमुच्चयः। नश्यंतिप[illegible]हृष्यंतित्रस्यंतिचभवद्विषः। अविरोधेनसं
पादितयौगपद्यानांगुंफसमुच्चयः। यथावा। बिभ्राणाहृदयेत्वयाविनिहितंप्रेमाभिधानंनवंश
ल्यंयद्विदधातिसंविधुरितासाधोतदावर्ण्यतां। शेतेशुष्यतिताम्यतिप्रलपतिप्रम्लायतिप्रेंखति
भ्राम्यत्युल्लुठतिप्रणश्यतिगलत्युन्मूर्छतित्रुट्यति। अत्रकासांचित्क्रियाणांकिंचित्कालसंभवे
पिशातपत्रभेदन्यायेनयौगपद्यंविरहातिशय्यद्योतनायविवक्षितमितिलक्षणानुगतिः। अहंप्र
थमिकाभाजामेककार्यान्वयेपिसः। कुलंरूपंवयोविद्याधनंचमदयंत्यमुं। यत्रैकःकार्यसिद्धि
हेतुत्वेनप्रक्रांतस्तत्रान्योपियद्यहमहमिकयाखलेकपोतिकान्यायेनतत्सिद्धिंकुर्वंतिसोपि
समुच्चयः। यथा। मदेअभिजात्यमेकंसमग्रंकारणंतद्वद्वरूपादिकमपितत्साधनत्वेना
वतरति। यथावा। प्रस्थानंप्रच्छन्नंगद्गदमुपयातेसंभ्रमविधिर्निरुद्धेकोलक्ष्म्यामनभिपवंगंधाः
परकथाः। प्रियंकृत्वामौनंसदसिकथनंचाप्युपकृतेःश्रुतेसंतासक्तिःपुरुषमभिजातक
ययति। क्रमिकेकगतानांतुगुंफःकारकदीपकं। गच्छत्यागच्छतिपुनःपांथःपश्यतिपृच्छति।

यथा वा। निद्राति स्नाति भुंक्ते चलति कचभारान् शोषयत्यंतरास्ते दीव्यत्यक्षैर्न चायं गदितुमवसरः सायाहि याहि। इत्युद्दंडैः प्रभुणामसकृधिकृतैर्वारितान्द्वारि दीनानूपश्यास्मान्ब्धिकन्ये सरसिरुहरुचामंतरंगैरपांगैः॥ आद्योदाहरणे श्रुतस्य पांथस्य कर्तृकारकस्य गमनादिष्वन्वयः॥ द्वितीये त्वध्याहृतस्य प्रभोः कर्तृकारकस्यैकस्य निद्रादिष्वन्वय इत्येकस्यानेकवान्वये न दीपकच्छायापत्त्याकारकदीपकं। प्रथमसमुच्चयप्रतिद्वंद्वी पदं। समाधिः कार्यसौकर्यं कारणांतरसन्निधेः॥ उत्कंठिता च तरुणी जगमास्तं च भानुमान्॥ यथा वा। मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः। उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितं। केनचिदारब्धस्य कारणांतरसन्निधानात्सौकर्यं तत्सम्यगाधानात्समाधिः॥ द्वितीयसमुच्चयप्रतिद्वंद्व्ययं समाधिः॥ तत्र बहूनां प्रत्येकं समर्थानां खलेकपोतन्यायेन युगपत्कार्यसाधनार्थमवतारः॥ अत्र त्वेकेन कार्ये समारिप्सिते। न्यस्य काकतालीयन्यायेनापतितस्य तत्सौकर्याधायकत्वमात्रमुदाहरणे। उत्कंठितेत्युक्तं गतेव प्रिया। भिसरणे पुष्कलं कारणं न त्वंधकारगमनं अपेक्षते। अत्यारूढो हि नारीणामकालज्ञो भव इति न्यायात्। दैवादापतितांधकारेण तत्सौकर्यमात्रमिति। एवं द्वितीयोदाहरणेपि योज्यं। प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः॥ जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधः कृतौ। यथा वा। मम रूपकीर्त्तिमहरद्भुवि यस्तदनुप्रविष्टहृदयेयमिति। त्वयि मत्सरादिव निरस्तदयः सुतरां क्षिणोति खलु तां मदनः॥ एवं बलवति प्रतिपक्षे प्रतिकर्तुमशक्तस्य तदीयबाधनं॥ ३८

प्रत्यनीकमितिस्थितेसाक्षात्प्रतिपक्षेपराक्रमः। प्रत्यनीकमिति कैमुतिकन्यायेनफलति। यथा। मधुव्रतौ
घः कुपितः स्वकीयमधुप्रपापद्मनिमीलनेन। बिंबंसमारुह्यबलात्सुधांशोः कलंकमंकेध्रुवमातनोति॥
सं कैमुत्येनार्थसिद्धिःकाव्यार्थापत्तिरिष्यते। सजितस्त्वन्मुखेनेंदुः कावार्त्तासरसीरुहां। अत्रसख्येन
नपद्मानियेनजितानिइतिविवक्षितं। तथाच। सोपियेनजितस्तेनपद्माविजितानीतिकिमुवक्तव्यमि
तिदंडापूपिकान्यायेनपद्मजयरूपस्यार्थस्यसंसिद्धिः काव्यार्थापत्तिः। तांत्रिकाभिमतार्थापत्तिव्याव
र्त्तनायकाव्यविशेषणं। यथावा। अधरोयमधीराक्ष्याबंधुजीवप्रभाहरः। अन्यजीवप्रभांहंतहरती
तिकिमद्भुतं। यथावा। स्वकीयंहृदयंभित्वानिर्गतौयौपयोधरौ। हृदयस्यान्यदीयस्यभेदनेकाकृपातयोः।
समर्थनीयस्यार्थस्यकाव्यलिंगंसमर्थनं। जितोसिमंदकंदर्पमच्चित्तेस्तित्रिलोचनः। अत्रकंदर्पजयो
पन्यासस्यदुष्करविषयत्वात्समर्थनसापेक्षस्यमच्चित्तेस्तित्रिलोचनइतिस्वांतःकरणेशिवसन्नि
धानप्रदर्शनेनसमर्थनंकाव्यलिंगं। व्याप्तिपक्षधर्मतादिसापेक्षनैय्यायिकोक्तलिंगव्यावर्त्तनायका
व्यविशेषणं। इदंवाक्यार्थहेतुकंकाव्यलिंगं। पदार्थहेतुकंयथा। भस्मोद्धूलनभद्रमस्तुभवतेरुद्रा
क्षमालेशुभंहासोपानपरंपरेगिरिसुताकांतालयालंकृते। अद्याराधनतोषितेनविभुनायुष्मत्स
पर्यासुखालोकोच्छेदिनिमोक्षनामनिमहामोहेनिपीयामहे। अत्रमोक्षस्यमहामोहत्वंअप्रसि
द्धमितितत्समर्थनसुखालोकोच्छेदिनिइतिपदार्थोहेतुः। क्वचित्पदार्थवाक्यार्थौपरस्परापेक्षौ
हेतौभावंव्रजतः। यथावा। चिकुरप्रकराजयंतितेविदुषीमूर्द्धनिसाबिभर्त्तियान्। पशुनाप्य
पुरस्कृतेनतत्तुलनामिच्छतुचामरेणकः। अत्रचामरस्यदमयंतीकुंतलसाम्याभावेविदुषी
मूर्द्धनियान्बिभर्त्तिसेतिवाक्यार्थः। पशुनाप्यपुरस्कृतेनेतिपदार्थश्चेत्युभयंमिलितंहेतुः॥ क्वचि

समर्थनीयार्थसमर्थनार्थेवाक्यार्थपदार्थौहेतुः। यथा। वपुःप्रादुर्भावादनुमिदमिदंजन्मनिपुरापुरारेनका
म पिक्वापिक्वचिदपिभवंतंप्रणतवान्। नमन्मुक्तःसंप्रत्यहमतनुरग्रेप्यनतिमान्महेशक्षंतव्यंतदिद
मपराधद्वयमपि। अत्रतावदपराधद्वयमपिसमर्थनीयमस्पष्टार्थत्वात्। तत्समर्थनंचपूर्वापरजन्मनो
रनमनाभ्यांवाक्यार्थभूताभ्यांक्रियते। अत्रद्वितीयवाक्यार्थेअतनुत्वमेकपदार्थोहेतुः। अत्रापिसंप्र
तिनमन्मुक्तिरितिवाक्यार्थोहेतुः। क्वचित्परस्परविरुद्धयोःसमर्थनीययोःक्रमादुभौहेतुत्वंभजतः।
यथा। असोढातत्कालोल्लसदसहभावस्यतपसःकथानांविस्रंभेष्वथचरसिकःशैलदुहितुः। प्र
मोदंवोदिश्यात्कपटबटुवेषापनयनेत्वराशैथिल्याभ्यांयुगपदभियुक्तःस्मरहरः। अत्रत्रिवाक्स्य
पुपगतकृत्रिमब्रह्मचर्यापनयनत्वरातदनुवर्त्तनेछयोर्विरुद्धयोःक्रमाद्गिरिजातीव्रतपसोऽसहि
ष्णुत्वंतत्संलापकौतुकंचेतिउभावप्यर्थौहेतुत्वेननिबद्धौ। क्वचित्परस्परविरुद्धयोःसमर्थनीययो
रेकएवहेतुः। यथा। जीयादंबुधितनयाधररसस्वादयन्मुरारिरयं। अंबुधिमथनक्लेशांकलयन्वि
फलंरसफलंच। अत्रविफलत्वसफलत्वकलनयोर्विरुद्धयोरेकएवांबुधितनयाधररसास्वादो
हेतुः। इदंकाव्यलिंगंहेत्वलंकारइतिकेचिद्व्यवजहुः। हेगोदावरिदेवितावकतटोद्देशोकलिंगकवि
वीन्देवीबकुटदेशाद्दीनसखीसत्काविरक्तिंगतः। एनामर्णवमध्यसुप्तमुरजिन्नाभीसरोजास
नंब्रह्माणंगमयाक्षिप्रतौ। कथमसावेकाकिनीस्थास्यतीत्यत्रब्राह्मणःप्रापणंगोदावर्याःकथंकथंक
र्त्तव्यमित्यसंभावनीयार्थोपपादकस्यार्णवमध्येसादितद्विशेषणस्यन्यसनंश्लेषाख्योगुणइति। श्ले
षाविघटमानार्थघटकार्थस्यवर्णनमितिश्लेषलक्षणमितिचजयदेवेनोक्तं। वस्तुतस्त्वत्रापिपदार्थ

हेतुकं काव्यलिंगमेतद्भेदकाभावात्॥ ननु साभिप्रायपदार्थविन्यसनरूपात्परिकारात्काव्यलिंगस्य
किंप्रभेदकं। उच्यते। परिकरे पदार्थवाक्यार्थौ विवहेतुभावं भजतः॥ ननु यद्यपि सुखालोकोच्छेदिनी
सादिपदार्थहेतुकाव्यलिंगोदाहरणेऽपि अंगेष्वनतिमानित्यादिवाक्यार्थहेतुककाव्यलिंगोदाहरणे च प
दार्थवाक्यार्थौ विवहेतुभावं भजतः॥ तथापि पशुनाप्यपुरस्कृते नेति पदार्थहेतुकोदाहरणे मच्चित्ते स्थिति त्रि
लोचन इति वाक्यार्थहेतुकोदाहरणे च प्रतीयमानार्थस्यापि हेतुकोद्घनुप्रवेशो लक्ष्यते। पशुनेति
स्य विवेकस्याभिप्रायगर्भं। विदुषी स्यस्य प्रतिनिर्देशात्। त्रिलोचन इति च कंदर्पदाहकत्वतीयलो
चनत्वाभिप्रायगर्भं कंदर्पजयोपयोगित्वात्तस्यास्त्यं। तथापि न तयोः परिकर एव किंतु तदुपस्कृतापि
तं काव्यलिंगमपि प्रतीयमानाविवेकविशिष्टेन पशुनाप्यपुरस्कृते तत्वस्यानेकपदार्थस्य प्रतीयमान
कंदर्पदाहकभावत्वतीयलोचनाविशिष्टस्य शिवस्य चित्तसन्निधानस्य च वाच्यस्यैव हेतुभावात्।
न हि तयोर्हेतुभावं ताभ्यां प्रतीयमानं मध्ये किंचिद्दूरमस्ति। यथा सर्वाशुचिनिधानस्यास्यादिपदा
र्थपरिकरोदाहरणे सर्वाशुचिनिधानत्वादिनानेकेन पदार्थेन प्रतीयमानं शरीरस्यासंरक्षणीयत्वं।
यथा वा। वाक्यार्थपरिकरोदाहरणपर्यायोक्तविधया तत्तद्वाक्यार्थेन प्रतीयमानं नाहं व्यास इत्यादि॥
तस्मात्पशुनेत्यत्र त्रिलोचन इत्यत्र च प्रतीयमानं वाक्यस्यैव पदार्थस्य हेतुभावोपपादकतया काव्य
लिंगस्यांगमेव॥ यथा। त्वन्नेत्रसमानकांति सलिले मग्नं तदिंदीवरमित्यनेकवाक्यार्थहेतुकका
व्यलिंगोदाहरणे त्वन्नेत्रसमानकांत्या कानीं दीवरत्वादिहंसविशेषणानि। तेषां वाक्यार्थानां हेतुभावो
पपादकानीति। तत्र वाक्यार्थहेतुककाव्यलिंगे पदार्थहेतुककाव्यलिंगमिति। न तयोः काव्यलिंगोदाह
रणैकानिरदनुपपत्तिः॥ उक्तिरर्थांतरन्यासः स्यात्सामान्यविशेषयोः। हनूमानब्धिमतरद्दुष्करं किं महात्मनां॥

कं १

उणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवं। पुष्पमालानुषंगेण सूत्रं शिरसि धार्यते। सामान्यविशेषयोर्द्वयोरपि उक्तिरर्थांतरन्यासः॥ तयोश्चैकं प्रस्तुतमन्यदप्रस्तुतं भवति। ततश्च विशेषे प्रस्तुते न सहाप्रस्तुतसामान्यस्य सामान्ये प्रस्तुते नेतेन सहाप्रस्तुतविशेषरूपस्य वाक्यार्थस्य न्यसनमर्थांतरन्यास इत्युक्तं भवति। तत्राद्यस्य द्वितीयार्द्धमुदाहरणं द्वितीयस्य द्वितीयश्लोकः॥ नन्वयं काव्यलिंगान्नातिरिच्यते॥ उदाहरणद्वयेऽपि अप्रस्तुतयोः सामान्यविशेषयोः उक्तिः प्रस्तुतयोर्विशेषसामान्ययोः कथमुपकरोतीति विवेक्तव्यं। न हि सर्वथैवाप्रस्तुताऽनन्वय्यप्रस्तुताभिधानं युज्यते। न तावदप्रस्तुतप्रशंसायामिव प्रस्तुतव्यंजकतयाप्रस्तुतयोरपि सामान्यविशेषयोः स्वशब्दोपात्तत्वात्। नाप्यनुमानालंकार इव प्रस्तुतप्रतीतिजनकतया तद्धेतुहेतुमद्व्याप्तिपक्षधर्मताद्यभावात्। नापि दृष्टांतालंकार इवोपमानतया विश्रब्धघातदोषः। स्ववधाय खलस्य वीरकोपस्य करैः। वनतरुभंगध्वनिखिन्नहरिनिद्रातस्करः वारण इत्यादिषु सामान्यविशेषस्योपमानत्वदर्शनेऽपि विशेषे सामान्यस्य क्वचिदपि तद्दर्शनादुपमानतान्वयसामंजस्याप्रतीतेश्च॥ तस्मात्प्रस्तुतसमर्थकतयैवाप्रस्तुतस्योपयोग इहापि वक्तव्यः। ततश्च वाक्यार्थहेतुकं काव्यलिंगमेवात्रापि स्यात्। न त्वलंकारांतरस्यात्रावकाश इति चेत्। अत्र केचित्। समर्थनसापेक्षस्यार्थस्य समर्थनं काव्यलिंगं। निरपेक्षस्यापि प्रतीतिवैभवाद समर्थनेऽर्थांतरन्यासः। न हि यत्त्वन्नेत्रसमानकांति सलिल इत्यादि काव्यलिंगोदाहरणेष्विव॥ अथोपगूढे शरदा शशांके प्रावृड्ययौ शांततडित्कटाक्षा॥ कासां न सौभाग्यगुणोंऽगनानां नष्टःपरिभ्रष्टपयोधराणां॥ दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवांधकारं। क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव॥ इत्याद्यर्थांतरन्यासोदाहरणेषु

अस्तुतस्यसमर्थनार्थं नसमस्तीति।वस्तुतस्तुप्रायोवादोयंअर्थांतरन्यासेपिहिविशेषस्यसामान्येनसमर्थनान
पेक्षत्वेपिसामान्यविशेषणसमर्थनमपेक्षतएव।निर्विशेषंनसामान्यमितिन्यायेन।बहूनामप्यसाराणांसं
योगःकार्यसाधकइत्यादिसामान्यस्य।तृणैरारभ्यतेरज्जुस्तेननागोपिबध्यतइत्यादिलोकप्रसिद्ध
विशेषावधारणंविनाबुद्ध्यप्रतिष्ठितत्वाऽसंभवात्।नचतत्रसामान्यस्यकासांनसौभाग्यगुणेंगनानामि
त्यादिविशेषसमर्थनेसामान्यस्येवलोकसंप्रतिपन्नविशेषावतरणंविनैवबुद्ध्यप्रतिष्ठितत्वंसंभवती
तिश्लोकेतन्न्यसनंनापेक्षितमितिवाच्यं।सामान्यस्यसर्वत्रलोकसंप्रतिपन्नत्वनियमाभावात्।नहि
यायोधूमवान्सोग्निमानितिव्याप्तिरूपसामान्यस्यलोकसंप्रतिपन्नतयायथामहानसइतित
द्विशेषरूपदृष्टांतानुपादानसंभवमात्रेणाप्रसिद्धव्याप्तिरूपसामान्योपन्यासेपितद्विशेषरूपदृष्टां
तोपन्यासनिरपेक्षत्वंसंभवति।नचैवंसामान्येनविशेषसमर्थनस्थलेपि।क्वचित्तस्यसामा
न्यस्यलोकप्रसिद्धत्वाभावेतस्यबुध्यारोहायपुनर्विशेषांतरन्यसनप्रसंगइतिवाच्यं।इष्टापत्तेः।
व अत्रैवविषयेविकस्वरालंकारस्यानुपदमेवदर्शयिष्यमाणत्वात्।किंचकाव्यलिंगेपिनसर्वत्रसमर्थनं
सापेक्षत्वनियमः।चिकुरप्रकराजयंतितइत्यत्रतदभावादुपमानवस्तुषुवर्णनीयसाम्याभावेन
निंदायाःकविकुलक्षुण्णत्वेनात्रसमर्थनापेक्षत्वविरहात्।नहि।तदास्यदास्यपिगतोधिका
रितांनशारदःपार्वणशर्वरीश्वरइत्यादिषुसमर्थनंदृश्यते।नविषेणनशस्त्रेणनाग्निनानच
मृत्युना।अप्रतीकारपारुष्याःस्त्रीभिरेवस्त्रियःकृताःइत्यादिकाव्यलिंगविशेषेषुस
मर्थनापेक्षाविरहेपिअप्रतीकारपारुष्याइत्यादिनासमर्थनदर्शनाच्च।नहितत्रस्त्रीणां

विषयादिनिर्मितत्वाभावप्रतिपादनंसमर्थनसापेक्षंप्रसिद्धत्वात्तस्मादुभयतोव्यभिचारात्समर्थनस्यसा
पेक्षत्वेकाव्यलिंगंतन्निरपेक्षसमर्थनेऽर्थांतरन्यासइतिनविभागः।किंतुसमर्थ्यसमर्थकयोःसामा
न्यविशेषसंबंधेऽर्थांतरन्यासस्तदितरसंबंधेकाव्यलिंगमित्येवव्यवस्थावधारणीया।प्रपंच
श्चित्रमीमांसायांद्रष्टव्यः।एवमप्रकृतेनप्रकृतसमर्थनमुदाहृतं।प्रकृतेनाप्रकृतसमर्थनंयथा॥
यदुच्यतेपार्वतिपापवृत्तयेनरूपमित्यव्यभिचारितद्वचः।तथाहितेशीलमुदारदर्शनेतपस्वि
नामप्युपदेशतांगतम्।यथावा।दानंददत्यपिजलैःसहसाधिरूढेकोविद्यमानगतिरासितुमु
त्सहेत।यद्दंतिनःकटकटाहतटान्मिमंक्षोर्मंक्षूदपातिपरितःपटलैरलीनां।यस्मिन्विशेषसा
मान्यविशेषःसविकस्वरः।नसजिग्येमहांतोहिदुर्द्धर्षाःसागराइव।यत्रकस्यचिद्विशेषस्यसम
र्थनार्थंसामान्यंविन्यस्यतस्यप्रसिद्धावप्यपरितुष्यताकविनातत्समर्थनायपुनर्विशेषांतरमुप
मारीत्यार्थांतरन्यासविधयावाविन्यस्यतेतत्रविकस्वरालंकारः।उत्तरार्द्धंतुव्यक्तमुदाहरणम्।
अनंतरत्नप्रभवस्ययस्यहिमंनसौभाग्यविलोपिजातं।एकोहिदोषोगुणसंनिपातेनिम
ज्जतींदोःकिरणेष्विवांकः।इदमुपमारीत्याविशेषांतरन्यासेनोदाहरणं।अर्थांतरन्य
सनविधयायथा।कर्णारुंतुदमंतरेणरणितंगाहस्वकाकाश्रितंमाकंदंमकरंदशालिनमिह
त्वांमन्महेकोकिलं।धन्यानिस्थलकेतवेनकतिचिद्वस्तूनिकस्तूरिकांनेपालक्षितिपालभा
लपातितपंकेनशंकेतरः।यथावा।मालिन्यमब्जशशिनोर्मधुलिट्कलंकौदत्तोमुखेधू
लुतवदत्कुतिलकांजनाभ्यां।दोषान्वितःकचनमेलनतोगुणत्वंवक्तुर्गुणोहिवचसि

या

भ्रमविजलं भो। दोषे। निरुत्कर्षहितौ तद्धेतुत्वप्रकल्पनं। कचाः कलिंदजातीर तमालस्तोममेचकाः। कार्ष्यातिशयाहेतौ तद्धेतुत्वकल्पनं। प्रौढोक्तिर्यथा। वृक्षगतनैल्यातिशयाहेतौ यमुनातटरोहणे तद्धेतुत्वकल्पनं। यथा वा। कल्पतरुकामदोग्ध्रीचिंतामणिधनदशंखानां। रचितो रजोभिरथपतयुस्तेजश्चासांनिलरे वैरेषः। अत्र कल्पवृक्षाद्यैकैकं वितरणातिशयाय वर्णनीयराजवितरणहेतौ कल्पवृक्षपरागादिरूपपंचभूतनिर्मितत्वेन तद्धेतुत्वकल्पनं प्रौढोक्तिः। संभावनं यदीत्थं स्यादित्यूहोन्यस्य सिद्धये। यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव। यथा वा। कस्तूरिकामृगाणामंडाद्गंधगुणमखिलमादाय। यदि पुनरहं विधिः स्यां खलजिह्वां निवेशयिष्यामि। अत्र यद्यर्थोक्तौ कल्पनमतिशयोक्तिभेद इति काव्यप्रकाशकारः। किंचिन्मिथ्यात्वसिध्यर्थं मिथ्यार्थांतरकल्पनं। मिथ्याध्यवसितिर्वेश्यां वशयेत्खस्रजं वहन्। अत्र वेश्यावशीकरणस्यात्यंतासंभावितत्वसिद्ध्ये गगनकुसुममालिकाधारणरूपार्थांतरकल्पनं मिथ्याध्यवसितिः। यथा वा। अस्य क्षोणिपतेः परार्द्धपरया लक्षीकृताः संख्यया प्रज्ञाचक्षुरवेक्ष्यमाणबधिरश्राव्याः किलाकीर्त्तयः। गीयंते स्वरमष्टमं कलयता जातेन वंध्योदरान्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधेरोधसि। अत्राद्योदाहरणं निदर्शनागर्भं द्वितीयं तु शुद्धं (असंबंधे संबंधरूपाया अतिशयोक्तेर्मिथ्याध्यवसितेः किंचिन्मिथ्यात्वसिध्यर्थं मिथ्यार्थांतरकल्पनात्मना विच्छित्तिविशेषेण भेदः। प्रस्तुतवर्ण्यवाक्यार्थप्रतिबिंबस्य वर्णनं। ललितं निर्गते नीरे सेतुमेषा चिकीर्षति। प्रस्तुतधर्मिणि यो वर्णनीयो वाक्यार्थस्तमवर्णयित्वा तत्रैव तत्स्वरूपस्य कस्यचिदप्रस्तुतवाक्यार्थस्य वर्णनं ललितं। यथा कथंचिद्दाक्षिण्यसमागतं तत्कालोपेक्षितप्रेति

विरहत्त नायिकांतरासक्त नायकानयनार्थं सखीं प्रेषयितुकामामुद्दिश्य सख्यावचनेन तद्व्यापा
रप्रतिबिंबभूतगते जले सेतुबंधवर्णनं। नेयमप्रस्तुतप्रशंसा। प्रस्तुतधर्मिकत्वात्। नापि
समासोक्तिः। प्रस्तुतवृत्तांते वर्ण्यमाने विशेषणसाधारण्येन सारूप्येण वा अप्रस्तुतवृत्तांत
स्फूर्त्यभावात्। अप्रस्तुतवृत्तांतादेव सरूपादिना प्रस्तुतवृत्तांतस्य गम्यत्वात्। नापि निदर्शना।
प्रस्तुताप्रस्तुतवृत्तांतयोः शब्दोपात्तयोः ऐक्यसमारोप एव तस्याः समुन्मेषात्। यदि विषयविष
यिणोः शब्दोपात्तयोः वर्त्तमान एवालंकारोषा विषयिमात्रोपादानेपि स्यात्। तदा रूपकमेव॥
भेदेप्यभेदरूपाया अतिशयोक्तेरपि विषमाक्रामत्। ननु तर्ह्यत्र प्रस्तुतनायिकवृत्तांतादिनिग
रणेन तच्छब्दोपात्ताप्रस्तुतनीराद्यभेदाध्यवसायइ। तभेदे अभेदरूपातिशयोक्तिरस्तु एवं
तर्हि सारूप्यनिबंधनाप्रस्तुतप्रशंसाविषयेपि सैवातिशयोक्तिः स्यात्। अप्रस्तुतधर्मिकत्वा
न्न भवतीति चेत्। तत्राप्रस्तुतधर्मिवाचकपदस्यापि प्रसिद्धातिशयोक्त्युदाहरणेष्विव प्रस्तुत
धर्मिलक्षकत्वासंभवात्। नन्वप्रस्तुतप्रशंसायां सरूपादप्रस्तुतवाक्यार्थात्प्रस्तुतवाक्यार्थो
वगम्यते। नन्वतिशयोक्तावेव विषयिवाचकेस्त्वेत्रतसंदेहविषया लक्ष्यंत इति भेद इति चेत्।
तर्हि इहापि प्रस्तुतगतादप्रस्तुतवृत्तांतरूपाद्वाक्यार्थात्तत्कृतप्रस्तुतवृत्तांतरूपो वाक्यार्थोव
गम्यत इति अतिशयोक्तितो भेदोस्तु। सोपूर्वो रसाना विपर्ययविधिस्तत्कर्णयोश्चापलं दृ
ष्टिः सा मदस्मृतस्वपरादिक्। किं भूयसोक्तेन वा। सर्वं निश्चितवानसि भ्रमर हे यद्वारणाद्या।

व्यस्तावं[illegible]ः शून्यकरो। निषेव्यतइति भ्रांतः क एष ग्रहः॥ इत्याद्यप्रस्तुतप्रशंसोर्थोवगम्यतइत्येतन्नघ
टते। अप्रस्तुतेवारणस्य भ्रमरासेव्यत्वेकर्णचापलमात्रस्य भ्रमरनिराकरणस्यहेतुत्वसंभवेपि
रशनाविपर्ययांतःशून्यकरत्वयोर्हेतुत्वासंभवेनमदस्यप्रस्तुततत्सेव्यत्वएवहेतुत्वेनचरशना
विपर्ययादीनांतत्रहेतुत्वान्वयार्थंवारणपदस्यप्रभुरूपविषयक्रोडीकारेणैवप्रवृत्तेर्वैकल्यत्वादेवं लेतो
सत्यपिपद्यप्रस्तुतसंबोधनादिविछित्तिविशेषात्तत्राप्रस्तुतप्रशंसाया अतिशयोभेदोघटते। तद
तदात्रापिप्रस्तुतंस्वपदेननिर्दिश्यतत्राप्रस्तुतवर्णनारूपस्यविछित्तिविशेषस्यसद्भावात्ततोभेदः
सुतरांघटते। पश्यनीलोत्पलद्वंद्वात्। वापीकापिस्फुरतिगगनेतत्परंसूक्ष्मपद्येत्यादिषु अप्रस्तुत
स्यकस्यचिद्धर्मिणःस्ववाचकेनानिर्दिष्टत्वादतिशयोक्तिरेव। एतेनगतजलसेतुबंधवर्णनादिषु
असंबंधेसंबंधवर्णनरूपातिशयोक्तिरस्त्वितिशंकापिनिरस्ता। तथासतिकस्त्वंभोः कथयामीत्या
दावपितत्प्रसंगात्सारूप्यनिबंधनाप्रस्तुतवाक्यार्थावगतिरूपविछित्तिविशेषालंकारांतरकल्प
नंत्विहापितुल्यं। तस्मात्सर्वालंकारविलक्षणमिदंललितं। यथावा। कसूर्यप्रभवोवंशःक्वचा
ल्पविषयामतिः। तितीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरम्॥ अत्रापिनिदर्शनाभ्रांतिर्नकार्या॥
ईदृश्यामत्यासूर्यवंशंवर्णयितुमिच्छुरहमितिप्रस्तुतार्थानुपन्यासात्तत्प्रतिबिंबाप्रस्तुतार्थ
वर्णनाहेविषमालंकारविन्यासेनचकेवलंतात्पर्यस्यगम्यमानत्वात्। यथावा। अनायिदेशः
कतमस्त्वयाद्यवसंतमुक्तस्यदशांवनस्य। त्वदात्तसंकेततयाकृतार्थाश्रव्यापिनानेनजनेनसंज्ञा॥

अत्र कतमो देशस्त्वयापि रित्यक्त इति प्रस्तुतार्थमनुपन्यस्य संबंधेतमुक्तस्य रत्नामनायीतितल्लिति बिं
बभूतार्थमात्रोपन्यासाल्ललितालंकारः। उत्कंठितार्थसंसिद्धिर्विनायत्नं प्रहर्षणं। तामेव ध्याय
ते तस्मै निसृष्टा सैव दूतिका। उत्कं गाढ[illegible]च्छाविशेषः। सर्वेंद्रियरसास्वादो यत्रास्तीत्यभिम
न्यते। तप्रातीच्छां ससंकल्पामुत्कंठां कवयो विदुरित्युक्तलक्षणा। तद्विषयस्याप्युपायसंपादन
यत्नं विनासिद्धिः प्रहर्षणं उदाहरणं स्फुटं। यथावा। मेघैर्मेदुरमंबरं वनभुव[illegible]श्यामास्तमा
लद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय। इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंज
द्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः। अत्र राधामाधवयोः परस्परमुत्कंठितत्वं
प्रसिद्धतरं। अग्रे च ग्रंथकारेण निबद्धं इत्यत्रोदाहरणे लक्षणानुगतिः। वांछितार्थादधिका
र्थस्य संसिद्धिश्च प्रहर्षणं। दीपमुद्योजय[illegible]यावत्तावदभ्युदितो रविः। यथावा। चातक
स्त्रिचतुरान्पयःकणान्याचते जलधरं पिपासया। सोपि पूरयति विश्वमंभसा हंत हंत महता
मुदारता। यत्नादुपायसिद्ध्यर्थात्साक्षाल्लाभः फलस्य च। निध्यंजनौषधीमूलं खनता सा
धितो निधिः। फलोपायसिद्ध्यर्थात् यत्नान्मध्येउपायसिद्धिमनपेक्ष्य साक्षात्फलस्यैव लाभोपि
प्रहर्षणं। यथा निध्यंजनसिद्ध्यर्थं मूलिकां खनतस्तत्रैव निधिलाभः। यथावा। उच्चित्य प्रथ
ममवस्थितं मृगाक्षी पुष्पौघं श्रितविटपं ग्रहीतुकामा। आरोढुं पदमधादशोकयष्टावामूलं
पुनरपि तेन पुष्पिता भूत्। अत्र पुष्पग्रहणोपायभूतारोहसिद्ध्यर्थात्पदनिदधानात्तत्रैव

पुष्पग्रहणलाभः। इष्यमाणविरूद्धार्थसंप्राप्तिस्तु विषादनं। दीपमुद्योजयेद्यावन्निर्वाणस्तावदेव सः। य
थावा। रात्रिर्गमिष्यति भविष्यति सुप्रभातं भास्वानुदेष्यति हसिष्यति पंकजश्रीः। इत्थं विचिंतयति कोश
गते द्विरेफे हा हंत हंत नलिनीं गज उज्जहार। एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि। अपि मां
पावयेत्साध्वी स्नात्वेतीछति जान्हवी। काठिन्यं कुचयोः स्रष्टुं वांछंत्यः पादपद्मयोः। निंदंति च विधा
तारं त्वद्धाटीक्षुरियोषितः। तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनं। लाभोयमेव भूपालसेवकानां
नचेद्वधः। कस्यचिद्गुणेनान्यस्य गुणः दोषेण दोषाः गुणेन दोषो दोषेण गुणो वा यत्र वर्ण्यते स उल्लासः
इत्याद्यमाद्यस्योदाहरणं। तत्र पतिव्रतामहिमगुणेन तत्स्नानतो गंगायाः पावनत्वगुणो वर्णितः। इती
यश्लोके द्वितीयस्योदाहरणं। अत्र राज्ञो धाटीक्षुप्यमानानां अरियोषितां पद्भ्यां धावनपरिपंथिमार्द
वदोषेण तयोः काठिन्यमस्रष्टुं कुचयोः तत्स्रष्टवतो धातुर्निघत्वदोषो वर्णितः। तृतीयश्लोके तृतीयच
तुर्थयोरुदाहरणं। तत्र स्वजनमहिमगुणेन धनस्य तदनाश्रयणदोषेण राज्ञः क्रौर्यदोषेण तत्सेवकानां वधं
विना निर्गमनं गुणत्वेन वर्णितं। अनेनैव क्रमेणोदाहरणांतराणि। यथा। यदयं रथसंक्षोभादंसेनांसो निपी
डितः। एकः कृती मदंगेषु शेषमंगं भुवो भरः। अत्र नायिकासौंदर्यगुणेन तदंसनिपीडितस्य स्वांसस्य कृतित्व
गुणो वर्णितः। लोकानंदनचंदनद्रुमसखे नास्मिन्वने स्थीयतां दुर्वंशैः कठिनैरसारहृदयैराक्रांतमेत
द्वनं। तेषामन्योन्यनिघर्षजातदहनज्वालावलीसंकुला नस्वान्येव कुलानि केवलमिदं सर्वं दहेयुर्वनं।
अत्र वेणूनां परस्परसंजातदहनसंकुलत्वदोषेण वननाशरूपो दोषो वर्णितः। दानार्थिनो मधुकरा
यदि कर्णतालैर्दूरीकृताः करिवरेण मदांधबुध्या। तस्यैव गंडयुगमंडनहानिरेषा भृंगाः पुनर्विकचपद्म
अत्र भ्रमराणां अलंकरणत्वगुणेन गजस्य तत्स्रितिक्षेपो दोषत्वेन वर्णितः। आघ्रातं परिचुंबितं परि

[illegible]

मुहुर्लीढं पुनश्चर्वितं त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथां मा कृथाः। हे सद्रत्न तवैतदेव कुशलं यद्वानरे
णादरादंतःसारविचारणव्यसनिना चूर्णीकृतं नाश्मना। अत्र वानरस्य चापलदोषेण रत्नस्य चूर्ण
नाभावो गुणत्वेन वर्णितः। अत्र प्रथमचतुर्थयोरुल्लासोन्वर्थः मध्यमयोश्छत्रिन्यायेन लाक्षणिकः॥
ताभ्यां तौ यदि न स्यातामवज्ञालंकृतिस्तु सा। स्वल्पमेवांबु लभते प्रस्थं प्राप्यापि सागरं। मीलंति यदि
पद्मानि का हानिरमृतद्युतेः। ताभ्यां गुणदोषाभ्यां तौ गुणदोषौ। अत्र कस्यचिद्गुणेनान्यस्य गुणालाभो द्वि
तीयार्द्धमुदाहरणं। दोषेण दोषस्याप्राप्तौ तृतीयार्द्धं। यथा वा। मदुक्तीश्चेदंतर्मदयति सुधीभूय सुधियः किं
मस्या नाम स्यादरसपुरुषानादरभरैः। यथा यूनस्तद्वत्परमरमणीयापि रमणी कुमाराणामंतःकरणहरणं
केव कुरुते। त्वं चेत्संचरसे वृषेण लघुता का नाम दिग्दंतिनां व्यालैः कंकणभूषणानि कुरुषे हानिर्न हेम्नामपि।
मूर्द्धन्यं कुरुषे जडांशुमयशः किं नाम लोकत्रयीदीपस्यांबुजबांधवस्य जगतामीशोसि किं ब्रूमहे॥ आद्ये क
वितारमणीगुणाभ्यां अलसबालहृदयोल्लासरूपगुणाभावो वर्णितः। द्वितीये परमेश्वरानंकारदोषेण दिग्गजादी
नां लघुतारूपदोषाभावो वर्णितः। दोषस्याप्यभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्। विपदः संतु नः शश्वद्यासु
संकीर्त्यते हरिः। यथा वा। मय्येव जीर्णतां यातु यत्त्वयोपकृतं हरे। नरः प्रत्युपकारार्थी विपत्तिमभिकांक्षति।
इयं हनुमंतं प्रति राघवस्योक्तिः। अत्र प्रत्युपकाराभावो दोषः। तदभ्युपगमो हेतुर्गुणो विपत्त्याकांक्षायां। अत्र
सचोक्तिः साचव्यतिरेकमुखप्रयुक्तेन सामान्येन विशेषसमर्थनरूपेणार्थांतरन्यासेन दर्शिता। यथा वा। व्रजे
मभवदंतिकं प्रकृतिमेत्य पैशाचिकीं किमत्यरसंपदं प्रथमेनाथ नाथामहे। भवद्भवनदेहलीविकटतुंडदंडाहृ
तित्रुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयते। लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं। अखिले
षु विहंगेषु हंत स्वच्छंदचारिषु। शुकपंजरबंधस्ते मधुराणां गिरां फलम्। दोषस्य गुणत्वकल्पनं गुणस्य ४१

न

दोषत्वकल्पनं चलेद्गाः। उदाहरणेष्वाद्ये बहुमते विदुषि पुत्रे चिरं राजधान्यां प्रवसति तद्दर्शनोत्कंठितस्य गृहे स्थितस्य पितुर्वचनं अप्रस्तुतप्रशंसारूपं। तत्र प्रथमार्द्धेतरविहंगानामवक्तृत्वस्य दोषस्य स्वच्छंदचारणानुकूलतया गुणत्वं कल्पितं। द्वितीयार्द्धे मधुरभाषित्वस्य गुणस्य पंजरबंधहेतुतया दोषत्वं कल्पितं। न चात्र व्याजस्तुतिराशंकनीया। नह्यत्र विहंगांतराणां स्तुतिव्याजेन निंदायां शुकस्य निंदाव्याजेन वा स्तुतौ च तात्पर्यं। किंतु पुत्रदर्शनोत्कंठितस्य दोषगुणयोर्गुणदोषत्वाभिमान एवात्र श्लोके निबद्धः। यथा वा। संतः सच्चरितोदयव्यसनिनः प्रादुर्भवद्यंत्रणाः सर्वत्रैव जनापवादचकिता जीवंति दुःखं सदा। अव्युत्पन्नमतिः कृतेन न सता नैवासता व्याकुलो युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः। दंडी त्वत्रोदाजहार। युवैव गुणवान्राजा योग्यस्ते पतिरूर्जितः। रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि। चपलो निर्दयश्चासौ जनः किं तेन मे सखि। आगःप्रमार्जनायैव चाटवो येन शिक्षिताः। अत्राद्यश्लोके राज्ञो वीरोत्सेकस्तुतिः कन्यायां निरंतरभोगाभिलाषिणि विशेषतः दोषत्वेन प्रतिभासमानस्य पिप्रस्य विदग्धसख्या राजकोपपरिजिहीर्षया स एव दोषो गुणत्वेन वर्णितः। उत्तरश्लोके सखी निरूपदिष्टं मानं कर्त्तुमशक्नुयापि तासामयतो मानपरिग्रहानुगुणं प्रतिज्ञाय तदनिर्वाहमाशंकमानया सखीनामुपहासं परिजिहीर्षं अँगेस्यायिकया तस्य चाटुकारिता गुण एव दोषत्वेन वर्णितः। न चाद्यश्लोके स्तुतिर्निंदापर्यवसायिनी। द्वितीयश्लोके निंदा स्तुतिपर्यवसायिनी व्याजस्तुतिराशंकनीया॥ राजप्रकोपादिपरिहारार्थमिह निंदास्तुत्योरन्याविदितत्वेनात एवोदयादेनेनलतो विशेषादिति

नस्तुत इह व्याजस्तुतिसद्भावेपि न दोषः। न ह्येतावता लेशमात्रस्य व्याजस्तुत्यंतर्भावः प्रसज्यते। तदसंकीर्णयोरपि लेशोदाहरणयोर्दर्शितत्वात्। नापि व्याजस्तुतिमात्रस्य लेशांतर्भावः प्रसज्यते भिन्नविषयत्वाद्व्याजस्तुत्युदाहरेषु। कस्त्वं वानर रामचंद्रभवने लेखवार्थसंवाहवाय द्दक्षां मुहुरीक्षसे न धनिनां ब्रूषे न चाटु मृषेत्यादिषु दोषगुणीकरणस्य गुणदोषीकरणस्य चाभावात्। तत्रान्यगुणदोषाभ्यामन्यत्र गुणदोषयोः प्रतीतिविषयैकोपि। इंदोर्लक्ष्म त्रिपुरजयिनः कंठमूलं मुरारिर्दिङ्नागानां मदजलमषीभांजि गंडस्थलानि। अद्याप्युर्वीवलयतिलकश्यामलिम्नानुलिप्तान्याभासंते वद धवलितं किं यशोभिस्त्वदीयैः। इत्येषूदाहरणेषु लेशास्पर्शात्। अत्र हि। इंदुलक्ष्मादिधवलीकरणाभावे दोष एव गुणत्वेन पर्यवस्यति। किंतु परिसंख्यारूपेण ततोन्यसर्वं धवलितमित्यंसो गुणः प्रतीयते। क्वचिद्व्याजस्तुत्युदाहरणे गुणदोषीकरणसत्वेपि स्तुतेर्विषयांतरमपि दृश्यते। यथा। सर्वदा सर्वदोसीति मिथ्या त्वं कथ्यसे बुधैः। नारयो लेभिरे पृष्ठं न वक्षः परयोषितः। अत्र हि वाच्यया निंदया परिसंख्यारूपेण ततोन्यत्सर्वं अभिमतं। अर्थिनां दीनाराद्यं दीयत इति स्तुत्यंतरमपि प्रतीयते। एवं चेषूदाहरणेषु कस्ते शौर्यमदा युद्धमित्यादिषु गुणदोषीकरणादिकमेव स्तुतिरूपयोतंवतिष्ठते। तत्र लेशव्याजस्तुत्योः संकरोस्तु इष्टमेव हि व्याजस्तुत्यप्रस्तुतप्रशंसयोरपि प्राक् संकरो दर्शितः। सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः। नितंबगुर्वी तरुणी दृग्युग्मविपुला च सा। अत्र नायिकावर्णनपदैर्नास्यानुष्टुभो विपुलानामत्वरूपसूच्यार्थसूचनं मुद्रा। यद्यप्यत्र ग्रंथे रत्ननाम्नो नास्ति सूचनीयत्वं। तथाप्यस्या

स्य लक्ष्यलक्षणयुक्तछंदःशास्त्रपातित्वेन तस्य सूचनीयस्य[illegible]यमस्तीति तदभिप्रायेण लक्षणं।
ऽयं। एवं रत्नमालायां सूचनीयरत्ननामनिवेशनेन। तत्तन्नाम कछंदादिकसूचनं। नक्षत्रादिमालायाम
न्ने देवतानामभिर्नक्षत्रसूचनमित्यादावयमेवालंकारः। एवं नाटकेषु वक्ष्यमाणार्थसूचनेष्वपि। क्रमिकं प्र
कृतार्थानां न्यासं रत्नावलीं विदुः। चतुरास्यःपतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते। अत्र चतुरास्यादिपदैर्व
र्णनीयस्य ब्रह्मविष्णुरुद्रात्मतापि प्रतीयत इति प्रसिद्धसहपाठानां ब्रह्मादीनां क्रमेण निवेशनं रत्नाव
ली। यथा वा। रंस्यामप्रियतां छ्यनेकाठिनतावासे रसालिंगिते प्रह्लादैकरसे क्रमादुपचिते भूभृद्गुरुत्वाप
हे। कोकस्पर्द्धिनि भोगभाजि जनितानंगे नखवल्लीनोन्मुखवृशाति श्रीरमणावतारदशकबालेभव
त्यास्त्तने। प्रसिद्धसहपाठानां प्रसिद्धक्रमानुसारेणाप्ययमेवालंकारः। यथा। यस्य वह्निमयो हृद
येषु जलमयो लोचनपुटेषु मारुतमयः श्वसितेषु। क्ष्मामयोगेषु अकाशमयः शून्यतासु पंचमहाभू
तमयीमूर्त्तिरिवाद्भुतयत निहतप्रतिसामंततां पुरेषु प्रतापः। एवमष्टलोकपालनवग्रहादीनां प्रसिद्धसह
पाठानां यथाकथंचित्क्रमरूतापमानोपरंजकतादिप्रकारेण निवेशनेपि रत्नावल्यलंकारः। प्रकृतान्वयं विना
क्रमिकतत्तन्नाम्नां श्लेषभंग्यनिवेशनेप्ययमेवालंकारः। तद्गुणः। स्वगुणत्यागादन्यदीयगुणग्रहः।
पद्मरागायते नासामौक्तिकं तेऽधरत्विषा। यथा वा। वीर त्वद्रिपुरमणी परिघालं पल्लवानि संस्पृशंत्य। न
हरति वनभुवि निजकररुहरुचिरवचिता। नृपांडुपुत्रधिया। पुनः स्वगुणसंप्राप्तिः पूर्वरूपमनु
दाहृतं। हरकंठांशुलिप्तोऽपि शेषस्त्वद्यशसासितः। यथा वा। विभिन्नवर्णा गरुडाग्रजेन सूर्य
स्य रथ्याः परितः स्फुरंत्यः। रत्नैः पुनर्यत्र रुचा रुचं स्वमानिन्यिरे वंशकरीरनीलैः। अयमेव
तद्गुण इति केचिद्व्यवजहुः।।

स्वगुणं परित्यज्य इति ल्यब्लोपे पंचमी।

प

रूपावस्थानुवृत्तिश्च विवक्षिते सति वस्तुनि। दीपे निर्वापिते प्यासीत्कांचीरत्नैर्महन्महः॥ लक्षणे च कारात्पूर्वरू
पमिति लक्ष्यवाचकपदानुवृत्तिः। यथा वा। द्वारं खड्गिभिरावृतं बहिरपि प्रस्विन्नगंडैर्गजैरंतःकं
चुकिभिर्लसन्मणिधरैरध्यासिता भूमयः। आक्रांतं महिषीभिरेव शयनं त्वद्विद्विषां मंदिरे राजन्
सैव चिरंतनप्रणयिनी शून्येपि राजस्थितिः॥ संगतान्यगुणानंगीकारमाहुरतद्गुणं। चिरंरागि
णि मच्चित्ते निहितापि न रज्यसि। यथा वा। गंडाभोगे विहरति मदैः पिच्छिले दिग्गजानां वैरिस्त्री
णां नयनकमलेष्वंजनानि प्रमार्ष्टि। यद्यप्येषा हिमकरकराद्वैतसौवस्तिकी ते कीर्तिर्दिक्षु स्फुरति
तदपि श्रीनृसिंहक्षितीन्द्र। ननु चान्यगुणेनैवान्यत्र गुणोदयात्तदनुदयाच्च मुल्लासावज्ञालंकारा
भ्यां तद्गुणातद्गुणयोः को भेद उच्यते। उल्लासावज्ञालक्षणयोः गुणशब्दो दोषप्रतिपक्षवाची। अन्य
गुणेन अन्यत्र गुणोदयस्तदनुदयो च नेतस्यैव गुणस्य संक्रमणासंक्रमणे किंतु सद्गुणपदेशेन सदस
च्छिष्ययोः शोभनास्यानुल्लसत्त्वेव तद्गुणजन्यत्वेन संभावितयोर्गुणांतरयोरुल्लासस्तु सत्त्वे तद्गुणातद्गुण
योः पुनर्गुणशब्दो रूपरसगंधादिगुणवाची। तत्रान्यदीयगुणग्रहणाग्रहणे च रक्तस्फटिकवस्त्र
मालिन्यादिन्यायेनान्यदीयगुणेनैवानुरंजनाननुरंजने विवक्षिते। तथैव चोदाहरणानि दर्शि
तानि। यद्यप्युल्लासालंकृतिरतद्गुणश्च विशेषोक्तिविशेषावेव कार्याजनिर्विशेषोक्तिः सति पुष्क
लकारण इति तत्सामान्यलक्षणाक्रांतत्वात्। तथापि उल्लासतद्गुणप्रतिद्वंद्विना विशेषाकारण।
लंकारेणांतरतया परिगणिताविति ध्येयं। प्राक्सिद्धस्वगुणोत्कर्षोनुगुणः परसन्निधे ४।

नीलोत्पलानिदधतेकटाक्षैरितिनीलतां।यथावा।कपिरपिचकापिङ्गायनमदमत्तोधरद्ध्विकेनसंद
ष्टः।अपिचपिङ्गाच्चग्रस्तः किंब्रूमोवैकृतंतस्य।अत्रकपित्वजात्याःस्वतःसिद्धस्यवैकृतस्यमद्य
सेवादिभिरुत्कर्षः।मिलितंयदिसादृश्याद्भेदएवनलक्ष्यते।रसोनालक्षिलाक्षायाश्चरणेसहजारु
णे।यथावा।मल्लिकामालभारिण्यः सर्वांगीणार्द्रचंदनाः।क्षौमवत्योनलक्ष्यंतेज्योत्स्नायामभिसारिकाः।
अत्राधश्चरणालक्तकयोरारुण्यगुणसाम्याद्भेदानध्यवसायः।द्वितीयोदाहरणेचंद्राभिसारिकाणांधव
लिमगुणसाम्याद्भेदानध्यवसायः।सामान्यंयदिसादृश्याद्विशेषोनोपलक्ष्यते।पद्माकरप्रविष्टानांमु
खंनालक्षिसुभ्रुवां।रत्नस्तंभेषुसंक्रांतप्रतिबिंबशतैर्वृतः।लंकेश्वरःसभामध्येनज्ञातोवालिसू
नुना।मिलितालंकारेएकेनपरस्यभिन्नस्वरूपानवभासरूपंमिलनंक्रियते।सामान्यालंका
रेतुभिन्नस्वरूपावभासेपिव्यावर्तकविशेषोनोपलक्ष्यतइतिभेदः।मिलितोदाहरणेचरणयोर्व
र्स्वंतरत्वेनागंतुकस्यावकादिनावभासते।सामान्योदाहरणेतुमुखानांचव्यक्त्यंतरतयाभानम पद्मानां
स्त्येवतथापिवर्णस्यतत्प्रतिबिंबानांकेकंत्विदंपद्ममिदंमुखमयंबिंबोयंप्रतिबिंबइतिविशेषःपरं
नोपलक्ष्यते।अतएवभेदतिरोधानान्मिलितंतद्दतिरोधानेपिसाम्येनव्यावर्तकानवभासेसामान्य
मित्युभयोरन्वर्थता।केचित्तुवस्तुद्वयस्यलक्षणसाम्यात्तयोः केनचिद्बलीयसातदन्यस्यस्वरूप
तिरोधानेमिलितं।स्वरूपप्रतीतावपिगुणेनसाम्याद्भेदतिरोधानेसामान्यं।एवंच।अपांगतरलेदृशौ
तरलवक्रवर्णागिरोविलासभरमंथरागमिरतीवकांतंमुखं।इतिस्फुरितमंगकेमृगदृशांस्वतो
लीलयातदत्रनमदोदयः कृतपदोपिसंलक्ष्यतइति।अत्रमीलितालंकारः।अत्रदृक्तारल्यादीनां

पुंवश्रावः

नारीवपुरूषः सहजधर्मत्वान्मदोदयकार्यत्वाच्च तदुभयसाधारण्यादुल्लष्टतारल्यादियोगिना वपुषा मदोदयस्य स्वरूपमेव तिरोधीयते लिंगसाधारण्ये न तज्ज्ञानोपायाभावान्मीलिकामाल्न भारिण्य इत्यादिषु साम्यालंकार इत्याहुः। तन्मते पद्माकरप्रविष्टानामित्यादौ भेदाध्यवसायेपि व्यावर्त्तकास्फुरणान्नालंकारांतरेण भाव्यं। सामान्यालंकारावांतरभेदेन वा पूर्वस्मिन्मते स्वरूपतिरोधानेनालंकारांतरेण भाव्यं। मिलितावांतरभेदेन वा। भेदवैशिष्ट्ययोः स्फूर्त्तावुन्मीलितविशेषकौ। हिमाद्रिं त्वद्यशोमग्नं सुराः शीतेन जानते। लक्षितान्युदिते चंद्रे पद्मानि च मुखानि च। मीलितन्यायेन भेदानध्यवसाये प्राप्ते कुतोपि हेतोर्भेदस्फूर्त्तौ मिलितप्रतिद्वंद्वि उन्मीलितम्। तथा सामान्यपरीत्या विशेषास्फुरणे प्राप्ते कुतश्चित्कारणाद्विशेषस्फूर्त्तौ तत्प्रतिद्वंद्वी विशेषः। क्रमेणोदाहरणद्वयं। तमुणरीत्यापि भेदानध्यवसायप्राप्तावुन्मीलितं दृश्यते। यथा न्दस्यम्रग्गीदृहासप्रसरसहचारी स्तावकीनैर्यशोभिर्धावल्यं नीयमाने त्रिजगति परितः श्रीनृसिंहक्षितींद्रा नेद्धयघोषनाभीकमलपरिमलप्रौढिमासादयिष्यन्देवानां नाम विष्णुः कथमपि कमलाकामुकस्यावबोधः। काकः कृष्णः पिकः कृष्णः को भेदः [illegible] पिककाकयोः। वसंतकाले संप्राप्ते काकः काकः पिकः पिकः। इदं विशेषकस्योदाहरणं। अत्र द्वितीयौ काकपिकशब्दौ काकत्वेन ज्ञातः पिकत्वेन ज्ञात इत्यर्थांतरसंक्रमितवाच्यौ। यथा वा। वाराणसीवासवतां जनानां साधारणे शंकरलांछनेपि॥ पार्श्वे प्रहारव्रणमुत्तमांगे प्राचीनमीशं प्रकटीकरोति। किंचिदाकूतसहितं स्याद्गूढोत्तरमुत्तरं। यत्रासौ वेतसी पांथ तत्रेयं [illegible] सुतरा सरित्। संतरणमार्गं पृच्छंतं प्रतिकामयमानार्याः प्रत्युत्तरम्॥

वेतसीकुंजेस्वाछंद्यामित्याकूतं। ग्रामेस्मिन्प्रस्तरप्राये न किंचित्पांथ विद्यते। पयोधरोन्नतिं दृष्ट्वा वस्तुमिच्छसि चेद्वस। आस्तरणादिकं चेद्याचमानं पांथं प्रति उक्तिरियं। स्तनोन्नतिं दृष्ट्वा रंतुमिच्छसि चेद्वस। अविदग्धजनप्राये स्मिन्ग्रामे कश्चिदवगमिष्यतीत्येतादृशं प्रतिबंधकं किंचिदपि नास्तीति हृदयं। इदमुन्नेयप्रश्नस्योदाहरणं। निबद्धप्रश्नमुत्तरं यथा। कुशलं तस्या जीवति कुशलं पृच्छामि जीवतीत्युक्तं। पुनरपि तद्देव कथयसि मृतां नु कथयामि या श्वसिति। अत्र ईर्ष्यामानानंतरं अनुतप्ताया नायिकायाः सखीमागतां प्रति कुशलं तस्या इति नायकप्रश्नः। जीवतीति सख्या उत्तरं। जीवंत्याः कुतः कुशलमिति तदभिप्रायः। अन्यत्पृष्टं अन्यदुत्तरमिति नायकस्य पुनः कुशलं पृच्छामीति प्रश्नः। पृष्टस्य उत्तरमुक्तमित्यभिप्रायेण जीवतीत्युक्तमिति सख्या वचनं। सखीवचनोद्घाटनार्थं पुनरपि तद्देव कथयसीति नायकस्याक्षेपः। मृतां नु कथयामि या श्वसितीति स्वाभिप्रायोद्घाटनमृ। मरणे सति तस्याः कुशलं भवति। मदागमनसमये पि श्वासेषु संचरत्सु कथं तां मृतां कथयपयमित्यपि प्रायः। प्रश्नोत्तरांतरभिन्नमुत्तरं चित्रमुच्यते। केदारपोषणरताः के खेटाः किंचलं वयः। अत्र केदारपोषणरता इति प्रश्नाभिन्नमुत्तरं केखेटाः किंचलं वय इति प्रश्नद्वयस्य वय इत्येकमुत्तरं। उदाहरणांतराणि विदग्धमुखमंडने दृष्टव्यानि। सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टितं। मयि पश्यति सा केशैः सीमंतमणिमावृणोत्। कामुकस्यावलोकनेन संकेतकालप्रश्नभावं ज्ञातवत्याश्चेष्टेयं। अस्तं गते सूर्ये संकेतकाल इत्याकूतं। यथा वा। संकेतकालमनसं विटं ज्ञात्वा विदग्धया। असीन्नेत्रार्पिताकूतं लीलापद्मं निमीलितं। पिहितं परवृत्तांतज्ञातुः साकूतचेष्टितं। प्रिये गृहागते प्रातः कांतातल्पमकल्पयत्। रात्रौ सपत्नीगृहे श्रांतोसीति तल्पकल्पनाकूतं। अथवा।

क्रस्पंदिस्वेदबिंदुप्रबंधैर्दृष्ट्वा लग्नं कुंकुमं कापि कंठे पुंस्त्वं तन्व्या व्यंजयंती वयस्या स्मित्वा पाणौ रवङ्ग
लेखां लिलेख। अत्र स्वेदानुमितं पुरुषायितं पुरुषोचितरवङ्गलेखनेन प्रकाशितं। व्याजोक्तिरन्य
हेतूक्त्या यदाकारस्य गोपनं। सखि पश्य गृहारामपरागैरस्मि धूसरा। अत्र चौर्यरतसंकेतभ
पृष्ठलुंठनेन लग्नधूलीजालस्य गोपनं। यथा वा। कस्य वा न भवेद्रोषः प्रियायाः सव्रणेऽधरे। स
भृंगं पद्ममाघ्रासीर्वारितापि मयाधुना। उपपतिनाखंडिताधरायाः नायिकायाः सकाशमागच्छंतं
प्रियमपश्यंत्येव सख्या नायिकां प्रति हितोपदेशव्याजेन तं प्रति नायिकापराधगोपनं। छेकापन्हुते
रस्याश्चायं विशेषः यत्तस्यां वचनस्यान्यथानयनेनापन्हवः। अस्यामाकारस्य हेत्वंतरवर्णनेन गो
पनमिति लक्ष्यते लक्ष्यनाम्नि चोक्तिग्रहणमाकारस्य गोपनार्थं हेत्वंतरप्रत्यायकव्यापारमात्रोपलक्षणं।
ततश्च आयांतमालोक्य हरिं प्रतोल्यामाल्याः पुरस्तादनुरागमेका॥ रोमांचकंपादिरुच्यमानंमामा
जुगूह गेहप्रणमं सथैनमित्यत्रापि व्याजोक्तिरेव। अत्र ह्यनुरागकृतस्य रोमांचाद्याकारस्य प्रणति
रूपहेत्वंतरप्रत्यायकेन प्रणामेन गोपनं कृतं। सूक्ष्मपिहितालंकारयोरपि चेष्टितग्रहणमुक्तिसा
धारणव्यापारमात्रोपलक्षणं। इतश्चानलिनीदले बलाकामरकतपात्ररवद्दृश्यते शुक्तिः। इति
न मम संकेतभुवि बलाकाभावं तदाब्रवीदालीमित्यादिष्वपि सूक्ष्मालंकारः प्रसरति। अत्र श्लोके ता
वकूकिमानयोः संकेतस्थानभविष्यतीति प्रश्नाशयं सूचयति कामुके तदभिज्ञया विदग्धया
दासीप्रति साकूतमुक्तमिति सूक्ष्मालंकारो भवति। यतोऽत्र बलाकया मरकतपात्रप्रतिष्ठितशुक्त्यु
पमया तस्याः निश्चलत्वेन आश्वस्तत्वं। तेन तस्य प्रदेशस्य निर्जनत्वं तेन तदेवावयोः संकेत

स्थानमिति कामुकं प्रति सूचनं च लक्ष्यते। न चात्र ध्वनिराशंकनीयः। दूरे व्यज्यमानस्यापि संकेतस्थान
प्रश्नो[illegible]रस्य स्वोक्त्येवानितत्वात्। एवं पिहितालंकारेप्युदाहर्त्तव्यं। इदं चान्यदत्रावधेयं। यत्रासौ
वेतसीपांथेत्यादिषु गूढोत्तरसूक्ष्मपिहितव्याजोक्त्युदाहरणेषु भावो न स्वोक्त्याविष्कृतः। किंतु वस्तु
सौंदर्यबलात् वक्तृबोद्धव्यविशेषविषये तावद्गम्यः। तत्र वस्तुतो नालंकारत्वं ध्वनिभावास्पदत्वात्प्राची
नैः स्वोक्त्याविष्करणे सत्यलंकारास्पदतास्वीमुदाहृतत्वात्। अस्माभिरप्युदाहृतानि। शाम्यंगिरिय
त्रासौ वेतसीपांथ तत्रेयं सुतरां सतिपत्रंतमभ्यानं कामिन्या लाससूचनमिया यथार्थांतिर कल्प
नया भावाविष्करणमित्यतः प्राकुलिखितेषूदाहरणेषु संकेतकालमनसं। पुंरसंतन्व्या व्यंजयतो॥
भामा जुगूहे इति भावाविष्करणमस्ति तेष्वेव तत्तदलंकार इति। गूढोक्तिरन्योद्देश्यं चेद्यदन्यं प्र
ति कथ्यते। वृषापेहि परक्षेत्रादायाति क्षेत्ररक्षकः। यं प्रति किंचिद्वक्तव्यं तत्तटस्थो मा विज्ञायीति
तदेव तदन्यं किंचित्प्रति श्लेषेणोच्यते चेत्सा गूढोक्तिः। वृषापेहीत्याद्युदाहरणं। इह परकलत्रमुपभुं
जानं कामुकं प्रति वक्तव्यं। परक्षेत्रसस्यानि भक्षयंतमुक्षाणं कंचित्समीपे चरंतं निर्दिश्य कथ्यते।
नेयमप्रस्तुतप्रशंसा। कार्यकारणत्वादिव्यंग्यत्वाभावात्। नापि श्लेषमात्रमप्रस्तुतार्थस्य प्रकृता
र्थान्वयित्वेन विवक्षितत्वात्। तस्य केवलमितरवंचनार्थं निर्दिष्टतया विच्छित्तिविशेषसद्भावा
त्। यथा वा। नाथो मे विपणिं गतो न गणयत्येसे पां सपत्नी च मांस्यक्का मामिरुपुष्पिणीति गुरवः
प्रासाग्टसाभ्यंतरे। शय्यामात्रसहायिनी परिजनः श्रांतो न मां सेवते स्वामिन्नाम मंगलाल
नीयरजनी लक्ष्मीपते रक्ष मां॥ अत्र लक्ष्मीपतिनाम्नो जारस्यागमनं प्रार्थयमानायास्तट
स्थवृंच नायकभगवंतप्रसाक्रोशस्य प्रसायन। विवृतोक्तिः श्लिष्टगुप्तं कविनाविष्कृतं यदि।
ममेति परक्षेत्रादितिवत्क्रिसस्सूचनं। श्लेषेण गुप्तं वस्तु यथा कथंचित्कविनाविष्कृतं चेत्तु विवृतो

॥ ७९:

रबाधेहीत्युदाहरणे पूर्ववन्मुखवस्तुस सुचनमिति कविनाविष्कृतं । यथा वा । वत्सेमागाविषादंश्वसन
मुरुजवंसंसजोर्ध्वप्रवृत्तंकंपःकोवागुरुस्तेकिमिहबलभिदाजृंभितेनात्रयाहि । प्रत्याख्यानंसुराणा
मितिभयशमनच्छद्मनाकारयित्वायस्यैलक्ष्मीमदाद्वःसहतुदुरितंमथमुग्धःपयोधिः । इदंच
परवंचनायैकविप्रौढाविष्करणं । यथा । दृष्ट्याकेशवगोपरागहृतयाकिंचिन्नदृष्टंमयातेनेहस्खलि
तास्मिनाथपतितांकिंनामनालंबसे । एकस्त्वंविषमेषुखिन्नमनसांसर्वाबलानांगतिर्गोप्यैवं
गदितःसलेशमवताद्गोष्ठेहरिर्वश्चिरं । अत्रपुरतःकृतस्यविषमेस्खलनमक्षिहितवृत्त्यास्तंकामय
मानायागोपिकायावचनेविषमपथेस्खलनपतनत्राणप्रार्थनारूपेऽदृष्टिप्रतीयमानेनार्थेनमुक्तंविव
क्षितंअर्थांतरंसलेशंसूचनमित्यनेनाविष्कृतं । एवंनैषधादिषु । चेतोनलंकामयतेमदीयंनान्यत्रकुत्रा
पिसाभिलाषमितिदमयंतीवाक्यादिकमप्युदाहरणं । सर्वमिदंशब्दशक्तिक्रोडीकृतप्रौढाविष्करणं
अर्थशक्तिमूलकप्रौढार्थाविष्करणंयथा । गच्छाम्यच्युतदर्शनेनभवतःकिंतृप्तिरुत्पद्यते किंचैवं
विजनस्थयोर्हतजनःसंभावयत्यन्यथा । इत्यामंत्रणभंगिसूचितवृथावस्थानखेदालसामाश्लि
ष्यन्पुलकोत्करांचिततनुर्गोपींहरिःपातुवः । अत्रगच्छाम्युपगतेत्याद्यामंत्रणेनत्वयारंतुमेतावत्कालं
स्थितंतत्रलब्धमित्यर्थशक्तिलभ्यंवस्तुतृतीयपादेनाविष्कृतं । सर्वमेतत्कविनिबद्धवक्तृप्रौढाविष्क
रणोदाहरणं । कविप्रौढाविष्करणंयथा । सुभ्रुत्वंकुपितेत्यपास्तमशनंत्यक्ताकथायोषितांदूरादेवावि
निर्जिताःसुरभयःस्रग्गंधधूपादयः । कोपंरागिणिमुंचमय्यवनतेदृष्टेप्रसीदाधुनासत्यंत्वद्वि
रहाद्भवंतिदयितेसर्वाममांधादिशः । तत्रतावदीर्ष्याकलुषितदयिताप्रसादनोव्यापाराझटितिप्रतीयते

दृष्टिरोगस्य दृष्टिं प्रत्याक्रोशो विवक्षितार्थः। दृष्टे रहस्यपदस्योच्चारणेन संबुद्धिरूपतामवगमय्य विवृ
तः कविनिबद्धवक्तुसंपरवंचनार्थकविगुप्तस्य प्रौढिप्रकटनार्थमिति भेदः। युक्तिः परातिसंधानं क्रि
यया मर्मगुप्तये। त्वामालिखंती दृष्ट्वान्यं धनुः पौष्पं करेऽलिखत्। अत्र पुष्पचापलेखनक्रियया
मन्मथो मयालिखित इति भ्रांत्युत्पादनेन स्वानुरागरूपमर्माप्रकाशनाय परवंचनं कृतं। यथा वा।
दंपत्योर्निशि जल्पितं गृहशुकेनाकर्णितं यद्वचस्तत्प्रातर्गुरुसन्निधौ निगदतस्तस्यातिमात्रं वधूः।
कर्णालंबितपद्मरागशकलं विन्यस्य चंचूपुटे व्रीडार्ता विदधाति दाडिमफलव्याजेन वाग्बंधनं ५।
अत्र शुकवाक्यमुद्रणायातशुखेन स्वकीयरहस्यनिर्वचनशुश्रूषुजनवंचनं कृतं। व्याजोक्तावाकार
पन गोपनं युक्तौ तदन्यैमिति भेदः। यद्वा। व्याजोक्तावुक्त्या गोपनमिह तु। क्रियया गोपनमिति भेदः। एवं चा
यां मालोक्य हरिं प्रतोल्यग्रमिति श्लोकेऽपि युक्तिरेवं। लोकप्रवादानुकृतिर्लोकोक्तिरिति गण्यते। सह
स्व कतिचिन्मासान्मीलयित्वा विलोचने। अत्र लोचनं मीलयित्वेति लोकप्रवादानुकृतिः। यथा
वा। मदीयवरदराजस्तवे। नामैव ते वरद वांछितदातृभावं व्याख्यात्यतो न वहसे वरदानमुद्रां। विप्र
प्रसिद्धतरविप्रकुलप्रसूतेर्यज्ञोपवीतवहनं नहि खल्वपेक्ष्यं। अत्रोत्तरार्द्धे लोकवादानुकारः। छेको
क्तिर्यत्र लोकोक्तेः स्यादर्थांतरगर्भिता। भुजंग एव जानीते भुजंगचरणं सखे। केनचित्कस्यचिद्वृत्तांते पृष्ट
स्य समीपस्थं निर्दिश्यायमेव तस्य वृत्तांतं जानातीत्युक्तेव तोयमहेः पादानहिरेव जानातीति लोकवा
दानुवादः। अत्र सचार्यं लोकविदितधनार्जनादिव्यापारे सहचारिणा विदितविषयतया लोकोक्त्यनु
वादस्य प्रयोजनं स्छितरहस्यपितस्यायं सहचर इति मर्मोद्घाटनमपि तेन गर्भितं कृतं। यथा वा।
मलयमरुतां व्राता ताबाता विकासितमल्लिकाः परिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि। घन घटयितुं

नः स्पृहं य एव विनिवर्त्तने प्रभवति गवां किन्नच्छिन्नं स एव धनंजयः। अत्र धनलिप्सया प्रेषितांगनासखीवचनय एव गवां निवर्त्तने प्रभवति स एव धनंजयः। इयं च जातिप्रसिद्धलोकवादानुकारः। अत्रातिसौंदर्यशालिनीं मामपहाय धनलिप्सया प्रस्थितो रसानभिज्ञ इति गोप्राय एव तस्य निवर्त्तकस्तु तस्य जेता धनेनाकृष्टस्य तद्विमुखीकरणप्रत्याकर्षत्वादित्यर्थांतरमपि गर्भेस्तं। वक्रोक्तिः श्लेषकाकुभ्यामपरार्थकल्पनं। मुंच मानं दिनं प्राप्तं नेह नंदी हरांतिके। अत्र मानं मुंच प्रभातप्राया रात्रिरित्यभिप्राये न दिनं प्राप्तं मां मुंचेत्यर्थांतरं श्लेषेण परिकल्पितं। यथा वा। अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता। त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्। इदमविकृतश्लेषोक्तेः उदाहरणं। विकृतश्लेषवक्रोक्तेर्यथा। भवित्री रंभोरु त्रिदशवदनग्लानिरधुना स ते रामः स्थाता न युधि पुरतो लक्ष्मणसखः। इयं यास्यत्युच्चैर्विपदमधुना वानरचमूर्लघिष्ठेदं षष्ठाक्षरपरविलोपात्पठ पुनः॥ सर्वमिदं शब्दश्लेषमूलाया वक्रोक्तेरुदाहरणं। अर्थश्लेषमूला यथा। भिक्षार्थी स क्व प्रयातः सुतनु बलिमखे तांडवं क्वाद्य भद्रे मन्ये वृंदावनांते क्व नु स मृगशिशुर्नैव जाने वराहं। बाले कच्चिन्न दृष्टो जरठवृषपतिर्गोप एवात्र वेत्ता लीलासंलाप इत्थं जलनिधिहिमवत्कन्ययोस्त्रायतां नः॥ काक्वा यथा। असमालोच्य कोपस्ते नोचितोयमितीरिता। नैवोचितोयमिति तं ताडयामास लीलया। अत्र नैवोचितमिति काक्वा स्वरविकारेण उचित एवेत्यर्थांतरं कल्पितं। स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनं। कुरंगैरुत्तरंगाक्षैः स्तब्धकर्णैरुदीक्षितं। यथा वा। तौ संमुखप्रचलितौ सविधे गुरूणां मार्गप्रदानरभसस्खलितावधानौ। पार्श्वोपसर्पणमुखावपि भिन्नदिक्कौ कृत्वा मुहुर्मुहुरुपासरतां सलज्जं। भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनं। अहं विलोकयेद्यापि युध्यंतेत्र सुरासुराः। स्थानभीषणत्वोद्भावनमिदं। यथा वा। अद्यापि तिष्ठति दृशोरिदमुत्तरीयं धर्तुं पुनः ४७

स्तनतटाप्रतितंप्रवृत्ते। वाचं निशम्य नयनं नयनं ममेति किंचित्तदा यदकरोत्स्मितमायताक्षी। उदात्तमृद्धिदितं श्लाघ्यं चान्योपलक्षणं। सानौ यस्याभवद्युद्धं तद्धूर्जटिकिरीटिनोः। इदं श्लाघ्यचरितस्यान्यांगत्वेनुदाहरणं तद्युदाहरणं यथा। रत्नस्तंभेषु संक्रांतप्रतिबिंबशतैर्वृतः। ज्ञातो लंकेश्वरः कृच्छ्रादांजनेयेन तत्वतः। अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनं। अर्थदातरि राजेंद्र याचकाः कल्पशाखिनः। इयमौदार्यात्युक्तिः। शौर्यात्युक्तिर्यथा। राजन्सप्ताप्यकूपारास्त्वत्प्रतापाग्निशोषिताः। त्वद्वैरिराजवनिताबाष्पपूरेण पूरिताः। संपदत्युक्तावुदात्तालंकारः। शौर्यात्युक्तावत्युक्त्यलंकार इति भेद इत्याहुः। अनयोरनवद्यांगि स्तनयोर्जृंभमाणयोः। अवकाशो न पर्याप्तस्तव बाहुलतांतरे। अल्पं निर्मितमाकाशमनालोच्यैव वेधसा। इदमेवंविधं भाविभवत्याः स्तनमंडलमिति सदसदुक्तितारतम्येनातिशयात्युक्त्योर्भेदः। निरुक्तिर्योगतो नाम्नामन्यार्थत्वकल्पनं। ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान्। यथा वा। पुराकवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासा। अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव। प्रतिषेधः प्रसिद्धस्यनिषेधस्यानुकीर्तनं। न द्यूतमेतत्कितव क्रीडनं निशितैः शरैः। निर्णीतो निषेधः स्वतोनुपयुक्तत्वादर्थांतरगर्भं करोतीति तेन चारुता। न्वितोयं प्रतिषेधो नामालंकारः। उदाहरणं। युद्धरंगप्रत्यर्थिं चेष्टमानं शकुनिं प्रति विदग्धवचनं। तत्र युद्धस्याक्षद्यूतत्वाभावान्निर्णीत एव कीर्त्यमानस्तत्रैव प्रागल्भ्यं न युद्धव्युत्पत्तिग्रहोऽस्तीत्युपहासं गर्भीकरोति। तच्च कितवस्येनेनाविष्कृतं। यथा वा। न विषेण न शस्त्रेण नाग्निना न च मृत्युना। अप्रतीकार

पारुष्याः स्त्रीभिरेव स्त्रियः सताः। अत्र स्त्रीणां विषादिनिर्मितत्वाभावः प्रसिद्ध एव कीर्त्यमा
नस्तासां विषाद्यतिशयं चिकीर्षितमिति अमुमर्थं व्यक्तीकरोति। स्वचाप्रतीकारपारुष्या इति प्रती
कारवद्भ्यो विषादिभ्यस्तासां विशेषं द्योतयता विशेषणेनाविष्कृतः। सिद्धस्यैव विधानं यत्तो
सामाकुर्विल्लंघ्य लक्षूति। पंचमो दंतकाले कोकिलः कोकिलोऽभवत्। निर्ज्ञातविधानमनुप
युक्तं बाधितं सहृदयांतरंगभंगीकरणेन चारुतरमिति तं विधिनामकमलंकारमाहुः। उदाहरणे
कोकिलत्वविधानमनुपयुक्तं तदिति मधुरपंचमध्वनिशालितया सकलजनहृद्यत्वं गमयदुत्क
रोति। तेनु पंचमोदंचन इति कालविशेषणेनाविष्कृतं। यथा वा। हे हस्त दक्षिण मृतस्य शिशोर्द्वि
जस्य जीवातवे विसृज शूद्रमुनौ कृपाणं। रामस्य गात्रमसि निर्भरगर्भखिन्नसीताप्रवासनप
टोः करुणा कुतस्ते। अत्र रामस्य हस्तं प्रति रामस्य गात्रमसीति वचनमनुपयुक्तं सद्रामस्यपस्ये
तेन स्वस्यात्यंतनिष्करुणत्वं गमयेत्करोति। तच्च निर्भरेत्यादिविशेषणेनाविष्कृतं। यद्यप्यनयो
र्विधिनिषेधयोरुदाहरणेषु व्यंग्यान्यर्थांतरसंक्रमितवाच्यरूपाणि तथापि न ध्वनिभावास्प
दानि। स्वोक्त्यैव व्यंग्याविष्करणात्। व्यंग्याविष्करणेन चालंकारत्वमेवेति प्राकृतस्तुतौ कुरप्रकर
णे व्यवस्थापितत्वात्। पूर्वं बादितौ विधिप्रतिषेधौ आक्षेपप्रकरणेनोक्तौ इह तु प्रसिद्धौ विधि
प्रतिषेधौ तत्प्रतिद्वंद्विनावलंकारांतरत्वेन वर्णिताविति भेदः। हेतोर्हेतुमता सार्द्धं वर्णनं हेतु
रुच्यते। असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवां। यथा वा। एष ते विद्रुमच्छायो मरुमार्गे

इवाधरः। कस्य नातनुते तन्वि पिपासाकुलितं मनः। मानेन गच्छति वारयत्युपशमे क्ष्मामालिखंत्यां
ह्रिया स्वातंत्र्ये परिवृत्य तिष्ठति करौ व्याधूय धैर्ये गते। तन्वंगि त्वामनुबध्नता फलमियत्प्राप्तं जने
नामुना यत्स्पृष्टो न पदा स एव चरणौ स्प्रष्टुं न संमन्यते इत्याद्युदाहरणं। हेतुहेतुमतोरैक्यं हेतुं के
चित्प्रचक्षते। लक्ष्मीविलासा विदुषां कटाक्षा वेंकटप्रभोः॥ अत्र कार्यविशेषं भावयतः शोऽध्यादिक्रियस्या
य नाधी कार्यकारणाभेदव्यपदेशः। यथावा। आयुर्दानमहोत्सवस्य विनतक्षोणीभृतां मूर्तिमान्
विश्वासो नयनोत्सवो मृगदृशां कीर्त्तेः प्रकाशोऽपरः। आनंदः कलिताकृतिः सुमनसां वीरश्रियो
जीवितं धर्मस्यैष निकेतनं विजयते वीरः कलिंगेश्वरः। अत्रदानमहोत्सवाद्यविष्कारित्वा
दिर्नाध्यवसितराजितदायुष्कादिर्व्यपदेशः। इत्थं व्रातमलंकारा लक्षयित्वा निरूपिताः। प्राचा
माधुनिकानां च मतान्यालोच्य सर्वतः। चत्वारो रसवत्प्रेय ऊर्जस्वि च समाहितं। भावस्य चोदयः
संधिः शबस्य लत्वमिति त्रयः। अष्टौ प्रमाणालंकाराः प्रत्यक्षप्रमुखाः क्रमात्। एवं पंच
दशान्यानप्यलंकारान्विदुर्बुधाः। तत्र विभावनानुभावव्यभिचारिभिर्व्यंजितो रतिहास
शोकादिश्चित्तवृत्तिविशेषो रसः। स यत्र परस्यांगं भवति तत्र रसवदलंकारः। भिन्नवा
नुभावाभ्यामभिव्यंजितनिर्वेदादिस्त्रयस्त्रिंशद्रतिर्देवतागुरुनृपद्विजकलत्रपुत्रादि
वभिव्यज्यमाना रतश्च भावः। स यत्र परस्यांगं तत्र प्रेयोलंकारः। अनौचित्येन प्रवृत्तो
रसो भावश्च रसाभासो भावाभासश्चेत्युच्यते। स यत्र परस्यांगं तदूर्जस्वि। भावस्य
प्रशाम्यदवस्था भावशांतिः तस्याः परांगत्वे समाहितं। भावस्योद्गमावस्था भावोदयः।

नंदः

ार्विरुद्ध्योर्भावयोः परस्पर्द्धो भावसंधिः। बहूनां भावानां पूर्वपूर्वोपमर्देनोत्पत्तिर्भावशबलता। एतेषामपरांग
त्वे भावोदयादयस्त्रयोऽलंकाराः। तत्र रसवदुदाहरणं। मुनिर्जयति योगींद्रो महात्मा कुंभसंभवः। येनैक
चुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ। अत्र मुनिविषयरतिरूपस्य भावस्याद्भुतरसोंगं। यथा वा। अयं
स रशनोत्कर्षी पीनस्तनविमर्द्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः। अत्र करुणस्य शृंगारो
गं। प्रेयोऽलंकार एव भावालंकार इत्युच्यते। यथा। कदा वाराणस्याममरतटिनीरोधसि वसन् वसानः कौ
पीनं शिरसि निदधानोंजलिपुटं। अये गौरीनाथ त्रिपुरहर शंभो त्रिनयन प्रसीदेति क्रोशन्निमिषमि
व नेष्यामि दिवसान्। अत्र शांतिरसस्य क्रंदेतिपदसूचितश्चिंताख्यो व्यभिचारिभावोंगं। यथा वा। अत्युच्चाः
परितः स्फुरंति गिरयः स्फारास्तथांभोधयस्तानेतानपि बिभ्रती किमपि न श्रांतासि तुभ्यं नमः। आश्च
र्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद्भुवस्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः। अत्र
प्रभुविषयरतिभावस्य वसुमतीविषयरतिभावोंगं। ऊर्जस्वि यथा। त्वत्प्रत्यर्थिवसुंधरेशतरुणीः संत्रास
तः सत्वरं यांतीर्वीर विलुंठितुं सरभसं याताः किराता वने। तिष्ठंति स्तिमिताः प्ररूढपुलकास्ते विस्मृतो
पक्रमास्तासामुत्तरलैः स्तनैरतितरां लोलैरपांगैरपि। अत्र प्रभुविषयेरतिभावस्य शृंगाररसाभासोंगं।
यथा वा। त्वयि लोचनगोचरं गते सफलं जन्म नृसिंहभूपते। अजनिष्ट ममाति सादरं युधि विश्राप
यति द्विषां गणः। अत्र कवेः प्रभुविषयेरतिभावस्य तद्विषयकः द्विषद्गणरतिरूपो भावाभासोंगं। समाहि
तं यथा। श्यामः। किमयं प्रपयुरंतिसक्ते यमियाल्लंबितं किं मां नालपतीत्ययं खलु षठः कोपस्तयाप्याश्रि
तः। इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थांतरे सव्याजं हसितं मया धृतिहरो मुक्तस्तु बाष्प
स्तया। अत्र शृंगाररसस्य कोपशांतिरंगं। भावोदयो यथा। तदवधि विश्रम्य दयालुरेधि मे दिनं निनी

५८

वामिभवद्विलोकिनी। अदस्त्रीपादेन विलिख्य पत्रिणा तवैव रूपेण समः समृत्प्रियः। अत्र नलं प्र
ति दमयंत्या औत्सुक्यरूपभावस्य उदयः शृंगाररसस्यांगं। भावसंधिर्यथा। एकाभ्रकुसु
मायुधेषुधिरिव प्रव्यक्तपुंखावली जेतुंमंगलपालिकेव पुलकैरन्या कपोलस्थली। लोला
क्षी क्षणमात्रभाविविरहक्लेशासहां पश्यतोङ्गाकर्णयतश्च वीरप्रवतः प्रौढाहवाडंबरम्।
अत्र रमणीप्रेमरणौत्सुक्ययोः संधिः प्रभुविषयभावस्यांगं। भावशबलं यथा। क्वाकार्यं शश
लक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेपि कांतं मुखं। किं व
क्ष्यंत्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योध
रं धास्यति। अत्र वितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिंतानां शबलता विप्रलंभस्य शृंगा
रस्यांगं। प्रमाणालंकारे प्रत्यक्षं यथा। कांतकांतवदनप्रतिबिंबे भग्नबालसहकारसुगं
धौ। स्वादुनि प्रणदितालिनि शीते निर्ववार मधुनींद्रियवर्गः। यथा वा। किं तावत्सरसि
सरोजमेतदारादाहोस्विन्मुखमवभासते युवत्याः। संशय्य क्षणमिति निश्चिकाय कश्चिद्बि
ब्बोकैर्बकसहवासिनां परोक्षैः। पूर्वंभ्रात्यसमात्रमत्रतु विशेषदर्शनजन्यसंशयोत्तरप्रत्यक्षमि
ति भेदः। अथानुमानं। यथा रंध्रं व्योम्नश्चलजलदधूमः स्थगयति स्फुलिंगानां रूपं दध
ति च यथा कीटमणयः। यथा विद्युज्ज्वालोल्लसितपरिपिंगाश्च ककुभस्तथा मन्ये लग्नः
पथिकतरुखंडे स्मरदवः। यथा वा। यत्रैता लहरीचलाचलदृशो व्यापारयंति भ्रुवं
यत्तत्रैव पतंति संततममी मर्मस्पृशो मार्गणाः। तच्चक्रीकृतचापपुंखितशरप्रेंखत्करः

कोपनो धावत्यग्रत एव शासनधरः सत्यं तदासां स्मरः। पूर्वरूपकसंकीर्णं। इत्थमतिशयोक्ति
संकीर्णमिति भेदः। अनुमानं यथा। निलीयमानैर्विहगैर्निमीलद्भिश्च पंकजैः। विकसं
त्या च मालत्या गतोस्तं ज्ञायते रविः। यथा वा। सौमित्रे ननु सेव्यतां तरुतलं चंडांशुरुज्जृंभते
चंडांशोर्निशि का कथा रघुपते चंद्रोयमुन्मीलति। वत्सैतद्विदितं कथं नु भवता धत्ते कुरं
गं यतः क्वासि प्रेयसि हा कुरंगनयने चंद्रानने जानकि। उपमानं यथा। तां रोहिणीं विजानीहि
ज्योतिषामत्र मंडले। यस्तन्वि तारकान्यासः शकटाकारमाश्रितः। यथा वा। अत्र मन्मथ
मिवातिसुंदरं दानवारिमिव दिव्यतेजसं। शैलराजमिव धैर्यशालिनं वेद्मि वेंकटपतिं
महीपतिं। पूर्वोदाहरणे उपमानमूलभूतमतिदेशवाक्यं दर्शितं। अत्रातिदेशवाक्यार्थसादृश्य
प्रत्यक्षरूपमुपमाभिधानं फलेन सह दर्शितमिति वि[illegible]शेषः। शब्दप्रमाणं यथा। विवक्ष
ता दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधु भाषितं। यमामनंत्यात्मभुवोपि कारणं कथं सल्लक्ष्य
प्रभवो भविष्यति। अत्र शिवः परमेष्ठिनोपि कारणमित्यत्र श्रुतिरूपं शब्दप्रमाणमुपन्यस्तम्।
एवं स्मृतिपुराणागमलौकिकसत्यवाक्यरूपाण्यपि शब्दप्रमाणान्युदाहर्तव्यानि। तत्र
स्मृतिर्यथा। बलात्कृतपापानि संतु तान्यकृतानि वः। सर्वान्बलकृतानर्थानकृतान्मनुरब्र
वीत्। पूर्वं श्रुतिरभिमतार्थप्रमाणत्वेनोपन्यस्ता। इह तु स्मृतिरनभिमतार्थे तद्दूषणपरेण ५०
प्रमाणतयोपनीतेति भेदः। आचारात्मा तु स्यार्पिमीमांसकोक्तधर्मप्रमाणं यो वेदशब्दानुमाप
कतया शब्दप्रमाण एवांतर्भावः। तत्राचारप्रमाणं यथा। महाजनाचारपरंपरेदृशी स्वनामनामा

ददते न साधवः। अतोभिधातुं न तदुत्सहे पुनर्जनः किलाचारमुचं विगायति॥ आत्मतुष्टिप्रमा
णं यथा॥ असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः। सतां हि संदेहपदेषु वस्तु
षु प्रमाणमंतःकरणप्रवृत्तयः। अत्र दुष्यंतेनात्मतुष्ट्या शकुंतलापरिग्रहस्य धर्मत्वं श्रुत्यनुमित
मुन्नीयते। एवं श्रुतिलिंगादिकमपि मीमांसकोक्तप्रमाणसंभवादिहोदाहर्तव्यं। तत्र श्रुतिर्यथा॥
ति ५ त्वं हि नाम्नैव वरदो बाधस्से वरमुद्रिकां। न हि प्रसिद्धार्थे लिंगगम्याद्रियते बुधः॥ अत्र कीर्तिगिरीश्वरस्य २५
वरद इत्यभिधानश्रुत्या सर्वाभिलषितदातृत्वं समर्थितं॥ लिंगं यथा॥ विदितं वो यथा स्वार्था न मे
काश्चित्प्रवृत्तयः। ननु मूर्तिभिरष्टाभिरित्थंभूतोस्मि सूचितः। अत्र शिवस्य श्रुतिप्रसिद्धसर्वो
पकारकत्वं पृथिव्याद्यष्टमूर्तिपरिग्रहलिंगेन तत्प्रवृत्तीनां लोकानुग्रहैकप्रयोजनत्वं समर्थितं।
लिंगस्य मूलभूतवेदानुमापकतया वैदिकशब्दप्रमाणएवांतर्भावः। एवं लौकिकलिंगानामपि
लौकिकशब्दोन्नायकतया लौकिकशब्दप्रमाणएवांतर्भावः। अतो लोलभ्रूलतया विपक्षदिगु
पन्यासे विधूतं शिरस्तद्वृत्तांतनिरीक्षणे कृतनमस्कारो विलक्षस्स्थितः। ईषत्ताम्रकपोलकांति
नि मुखे दृष्ट्या नतः पादयोरुत्सृष्टो गुरुसन्निधावपि विधिर्द्वाभ्यां न कालोचितः। इत्यादिचेष्टा
रूपं प्रमाणांतरं नात्र कीर्तनीयं। क्वचिच्छब्दप्रमाणकल्पनया चमत्कारः। यथा। किमसुभिर्ग्ल
पितैर्जड मन्यसे मयि निमज्जतु भीमसुतामनः। मम किल श्रुतिमाह तदर्थिकां नलमुखेंदुप
रां विबुधः स्मरः। अत्र म्रियमाणानां मनश्चंद्रं प्रविशतीति तदर्थिकायाः श्रुतेर्नलमुखेंदुपरत्वं
दुविषयत्वे कल्पितेन तथाव्याख्यानात्स्मरवाक्यं प्रमाणतयोपन्यस्तं। अर्थापत्तिर्यथा॥
निर्णेतुं शक्यमस्तीति मध्यं तव नितंबिनि। अन्यथा नोपपद्येत पयोधरभरस्थितिः।

यथा वा। व्यक्तं बलीयान्यदि हेतुरागमादपूरयत्सा जलधिं न जान्हवी। गंगौघनिर्भर्त्सितशुभ्रांशुकं धरासवर्णमर्णः कथमन्यथा स्यात्। अनुपलब्धिर्यथा। स्फुटमसदवलग्नं तन्वि निश्चित्य ते तत्तदनुपलभमानास्तर्कयंतोपि लोकाः। कुचगिरिवरयुग्मं यद्विनाधारमास्ते तदिह मकरकेतोरिंद्रजालं प्रतीमः। संभवो यथा। अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखं। किं तु त्वदग्रे शरणागतानां पराभवो नाथ न तेनुरूपः। यथा वा। ये नाम केचिदिह नः प्रथयंत्यवज्ञां जानंति ते किमपि तान्प्रति नैष यत्नः। उत्पत्स्यतेस्ति मम कोपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी। यथा वा। भ्रांतः पांथ कुतो भवानगगतो वार्ता नवा वर्तते बाढं ब्रूहि सुवापयोदसमये त्यक्ता प्रियं जीवति। स संजीव[illegible]ति जीवतीति कथिता वार्ता मया पिश्रुता विस्तीर्णा पृथिवी जनोपि च विधिः किं किं न संभाव्यते। अत्राद्योदाहरणे। अभूतपूर्वं मम त्ता विभावि किं वेति संभवप्रमाणसिद्धोर्थो दर्शितः। द्वितीयोदाहरणे। संभवोपपादकं कालानंत्यादि कमपि दर्शितं। तृतीयोदाहरणे तु संभवोपि कंठोक्त इति भेदः। ऐतिह्यं यथा। कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे। एति जीवंतमानंदो नरं वर्षशतादपि। अत्र लौकिकी गाथेयमित्य निर्दिष्टप्रवक्तृकप्रवादपारंपर्यक्रमेण दर्शिता। अथ तेषामलंकाराणां यथासंभवं क्वचिन्मेलने लौकिकालंकाराणां मेलन इव चारुतातिशयोपलंभान्नरसिंहन्यायेन पृथगलंकारस्थितौ तन्निर्णयः क्रियते। तत्र तिलतंडुलन्यायेन स्फुटावगम्यभेदालंकारमेलने संसृष्टिः। नीरक्षीरन्यायेनास्फुटभेदालंकारमेलने संकरः। स चांगांगिभावेन

ता

समप्राधान्येन संदेहेनएकवाचकानुप्रवेशेन च चतुर्विधः॥ एवंच सिंहाकारसंसृष्ट्या सिंहपंचालंकाराः॥
तत्र संसृष्टिर्यथा। कुसुमसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया। चलितया विदधे
कलमेखलाकलकलोऽलकलोलदृशान्यया। अत्र शब्दालंकारयोर्यमकानुप्रासयोः संसृष्टिः॥
लिंपतीव तमोंगानि वर्षतीवांजनं नभः। असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता। अत्रोत्प्रेक्षो
पमायोः। अर्थालंकारयोः संसृष्टिः॥ आनंदमंथरपुरंदरमुक्तमाल्यं मौलौ हठेन नि
हितं महिषासुरस्य। पादांबुजं भवतु मे विजयाय मंजुमंजीरशिंजितमनोहरमंबिकायाः॥ अ
त्र शब्दार्थालंकारयोरनुप्रासोपमयोः संसृष्टिः॥ अंगांगिभावसंकरो यथा। तलेषु वेषं तम
हीरुहाणां छायास्तदुत्सारितकंपितानां। शशांकसिंहेन तमोगजानां लूनाकृतीनामिव गात्र
खंडाः॥ अत्र शशांकसिंहेनेति तमोगजानामिति च रूपकं। यद्यप्यत्र शशांक एव सिंहस्तमांस्येव
गजा इति मयूरव्यंसकादिसमासाश्रयणेन रूपकं। शशांकः सिंह इव तमांसि गजा इवेत्युपमित
समासाश्रयणे तूपमापि वक्तुं शक्या तथापि लूनाकृतीनामिति विशेषणानुगुण्याद्रूपकं सिद्धं।
तस्यापि विशेषणस्य प्राधान्येन सहान्वयेन भाव्यं। न तु गुणेन। गुणानां च परार्थत्वादसंबंधः
समत्वास्यादिति न्यायादुपमितसमासाश्रयणे। तस्य पूर्वपदार्थप्रधानत्वाच्छशांकस्य तम
सां च प्राधान्यं भवेत्। तत्र च न विशेषणस्य मुख्यार्थान्वयस्वारस्यमस्ति। स्वरूपनाश
रूपोपचारिताद्वृत्तिलक्षणकर्तृत्वान्वयसंभवेपि मुख्यार्थान्वयस्वारस्यमेवादरणीयं॥

स्वरूपनाशकेपि प्रकारेण श्वरत्तयावलक्षणाम्लविशेषो तस्या रूपकसिद्धिः। तत्र रूपकमुत्प्रेक्षाया अं
गंतद्व्यापकसिद्धिः तत्र रूपकमुत्प्रेक्षाया अंगंतद्व्यापकत्वात्। रूपकाभावेहिछायालग
गात्रखंडारवावेपं तस्येतावदुक्तो रूपमेव सिध्येत्। रूपनादिसाधर्म्यात्। नछायायां। [illegible] सघः
रूतगात्रखंडतादात्म्यसंभावनारूपोत्प्रेक्षा। मनुजाशोकेनलूना कृतीनां तमसां गात्रखंग
डवावेपं तस्येतावदुक्तावपि सिध्येत्युत्प्रेक्षा। तादात्म्यस्य संभावनोपयुक्तलूनाकृति रूपादि
कविशेषणोपादानात्। ससं। तथोक्तावाकृति ७ वर्णादिधर्मरूपकार्य समारोपनिमित्तावाशा
कृतमासोहिं तां हंतव्यचेतनवृत्तांतसमारोपरूपासमासोक्तिरपेक्षणीया। एवमुक्तौ रूपक
मिति विशेषः। एवमन्यत्रापि ज्ञायो नि रूपकोत्प्रेक्षयामंगांगिभावेनसंकरः। समधोनोन्यसं
केरायथा। अवतुनः सवितुस्तुरगावली समतिलंघिततुंगपयोधरा स्फुरितमध्यगतारु
णनायकामरकतैककलेव नभःश्रियः। अत्र पयोधरादिशब्दश्लेषमूलातिशयोक्त्यंग
भूतया प्राप्यमानेव सवितुस्तुरगावल्यां गगनलक्ष्मीमरकतैकवल्ली तादात्म्योत्प्रेक्षा। नत्तो
लक्ष्म्या नायिकाव्यवहारसमारोपरूपसमासोक्तिर्गर्भेणोत्थाप्यते। पयोधरश्लेषोत्थ्या भयोकार
कत्वात्। ततश्चोत्प्रेक्षासमासोक्त्योरेककालः परस्परापेक्षया चारुत्वसमुन्मेषश्चोभयोस्तु
ल्य इति विनिगमनाविरहात् समप्राधान्यं। यथा वा। अंगुलीभिरिव केशसंचयं सन्निगृ
ह्य तिमिरं मरीचिभिः। कुड्मलीकृतसरोजलोचनं चुंबतीव रजनीमुखं शशी। अत्रांगु

ना

लीभिरिति वाक्योक्तोपमया तस्याश्च पाठान्तु रवकुड्मलीकरणालिंगनगुणया श्लेषोपमितसमा
साश्रयणेन लब्धया सरोजलोचनमिति समासो तयोपमायां कृतमोभावाभावमानेन शशि
कर्तृक निशामुखचुंबनोत्प्रेक्षा। निशाशशिनोर्दंपतिव्यवहारसमारोपरूपसमासोक्तिर्न भवे
क्षाप्यते। उपमयोरुभयत्र व्यापकत्वाविशेषात्। समासोक्तिगर्भतां विना चुंबनोत्प्रेक्षाया निरालं
बनतात्। ततश्चात्रोत्प्रेक्षासमासोक्त्योरेककालयोः समप्राधान्ये। यद्यप्यत्रोपमाभ्यां ग्रा
शि। निशागतावेव धर्मौ समर्थ्येते। ननु शशिनायकयोर्निशानायिकयोश्च साधारणे
धर्मे साधारणधर्मसमर्पणं चोत्प्रेक्षासमासोक्त्योरपेक्षितं। उत्प्रेक्षायाः प्रस्तुताप्र
स्तुतसाधारणगुणक्रियारूपनिमित्तसापेक्षत्वात्समासोक्तेर्विशेषणसाम्यमुक्त
लब्धत्वात्तथापि वाक्योक्तोपमायामिवकारस्य मरीचिभिरिवेत्यन्वयान्तरमभ्यु
पगम्यान्वयभेदलब्धस्य प्रस्तुताप्रस्तुतयोरेकैकविषयस्यार्थद्वयस्य समासोऽभ्यु
पमायां सरोजसदृशलोचनमिति समासोत्तरमभ्युपगम्य समासप्रभेदलब्धो
र्थद्वयस्य चाभेदाध्यवसायेन साधारण्यं संपद्य तयोरुत्प्रेक्षासमासो
क्त्योः संगता। निर्वाणा। यद्वा। इदुप्रकृतिकोटिगतानां मरीचितिमिरसरोजानाना
मप्रकृतिगतानामंगुलीकेशसंचयलोचनानां च तनुदीर्घीवरत्वनीलनिरं
ध्रत्वकोमलत्वादिना सदृशानां प्रातिस्वीकरूपेण भेदवदनुगतसाधारण्यप्र
योजकरूपेणाभेदोऽप्यस्ति। स चात्र विवक्षित एव। भेदाभेदोभयप्रधानोपमे

योलंकारसिद्धांतात्। तत्र च प्रयोजकांशानिष्कर्षन्यायेनाभेदगर्भतांशोपजीवनेन साधा
रण्यसंपाद्य प्रधानीभूतोत्प्रेक्षा समासोक्त्यंगता निर्वाह्या। नहि प्रकाशशीतापनयनश
क्तिमतः सौरतेजसः शीतापनयनशक्तिमात्रेण प्रकाशस्याग्निता न दृष्टा। एवमभ्युपगमे च। पांड्योयमं
सार्पितलंबहारः क्लृप्तांगरागो हरिचंदनेन। विभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रि
राजः इत्याद्युपमापि न निर्वहेत्। नह्यत्राद्रिराजपांड्ययोरुपमानोपमेययोरनुगतसाधारणध
र्मो निर्दिष्टः। एकत्र बालातपनिर्झरावन्यत्र हरिचंदनहाराविति धर्मभेदात्। तस्मात्तत्र आतप
हरिचंदनयोर्निर्झरयोश्चरहारयोरभेदांशोपजीवनमेव गतिः। पिनष्टीव तरंगाग्रैः समुद्रः फे
नचंदनं। तदादाय करैरिंदुर्लिंपतीव दिगंगनाः। अत्रोत्प्रेक्षयोः कालभेदेपि समप्राधान्यं। अन्यो
न्यनिरपेक्षवाक्यद्वयोपात्तत्वात्तदादायेति फेनरूपकमात्रोपजीवनेन पूर्वोत्प्रेक्षानपेक्षणात्। नचैवं
लिंपतीव तमोंगानीव उत्प्रेक्षाद्वयस्य संसृष्टिरेवेयमिति वाच्यं। लोकसिद्धपेषणलेपनपौर्वापर्यस्यानु
कारिणोत्प्रेक्षाद्वये पौर्वापर्येणाचारुतातिशयसमुन्मेषतः संसृष्टिवैषम्यात्। तस्याद्दृष्टांतवदेक
फलसाधनतया समप्रधानमिदमुत्प्रेक्षाद्वयं। संदेहसंकरो यथा। शशिनमुपगतेयं कौ
मुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुकन्यावतीर्णा। इति समगुणयोगप्रीतयस्तत्र पौराः श्रव
णकटु नृपाणामेकवाक्यं विवव्रुः। इयमिति सर्वनाम्ना पद्यजं वृतवती इंदुमती विशिष्टरू
पेण निर्दिश्यते तदा बिंबप्रतिबिंबभावापन्नधर्मविशिष्टयोः सदृशयोरैक्यारोपरूपा
निदर्शना। यदि तेन सा स्वरूपेणैव निर्दिश्यते बिंबभूतो धर्मस्तु पूर्वप्रस्तुतावालसमगुण

योगश्रीतयइतिपारविशेषणाच्चगम्यते। तदाप्रस्तुतेधर्मिणितद्वृत्तांतप्रतिबिंबभूताप्रस्तु
तवृत्तांतारोपणरूपंललितमितिसनध्यवसाया।संदेहः॥विलीयेंदुःसाक्षादमृतरसवापीय
दिभवेत्कलंकस्तत्रत्योयदिचविकचेंदीवरवनंततःस्नानक्रीडाजनितजडभावैरवयवैःक
दाचिन्मुंचेयंमदनशिखिपीडापरिभवं॥अत्रयद्येतावत्साधनंसंपद्येततदातापःशाम्यती
त्येतावत्यर्थेसंरंभश्चेत्तद्दोषात्तत्सिध्यर्थमस्तइतिसंभावनालंकारः॥एतावत्साधनंकदापि
नसंभवत्येवातस्तापशांतिरपिगगनकुसुमकल्पेत्यर्थेकविसंरंभश्चेत्तद्दोषात्तन्मिथ्यात्वसि
ध्यर्थंमिथ्यार्थांतरकल्पनारूपामिथ्याध्यवसितिरित्युभयथासंभवात्संदेहः॥एवंसितेकेस्फ
टिककुंभांतस्थितिश्वेतीकृतेजले॥मौक्तिकंचेल्लुतांस्कृतेतसुध्येस्तेसमयश्चारस्यादिदृष्टपिसं
भावनामिथ्याध्यवसितिसंदेहसंकरोदृष्टव्यः॥मुखेनगरलंमुंचन्मूलेवसतिचेन्मणी।
फलसंदोहगुरूणांतरूणांकिंप्रयोजनं॥अत्रमहोरगवृत्तांतेवर्ण्यमानेराजद्वारारूढख
लवृत्तांतोपिप्रतीयते।तत्रकिंवस्तुतस्तत्प्रधानभूतोरगवृत्तांतएवप्रस्तुते।प्रस्तुतःखल
वृत्तांतस्ततःप्रतीयतइतिसमासोक्तिः॥अथवाप्रस्तुतःखलवृत्तांतःतत्प्रत्यायना
याप्रस्तुतमहोरगवृत्तांतकीर्त्तनमप्रस्तुतप्रशंसा।यद्वा।वर्ण्यमानमहोरगवृत्तां
तकीर्त्तनेनसमीपस्थितखलमर्मोद्घाटनंक्रियतइत्युभयस्यापिप्रस्तुतत्वात्प्र
स्तुतांकुरइतिसंदेहः॥एकवाचकानुप्रवेशसंकरस्तुशब्दार्थालंकारयोरेवेति

लक्षयिला काव्यप्रकाशकार उदाजहार॥ स्पष्टोच्छकिरणकेसरसूर्यबिंबविस्तीर्णकर्णिकमथो।
दिवसारविंदं। श्लिष्टाष्टदिग्दलकलापमुखावतारबद्धांधकारमधुपावलि संचुकोच।
अत्रैकपादानुप्रविष्टो रूपकानुप्रासो। यत्रैकस्मिन्श्लोके पदभेदेन शब्दार्थालंकार
योः स्थितिस्तत्र तयोः संसृष्टिः। इह तु संकर इति। अलंकारसर्वस्वकारस्तु एक
स्मिन्वाचकेनुप्रवेशेन वाच्ययोरेवालंकारयोः स्वारसिकः। वाच्यप्रतियोगिकत्वाद्वा
चकस्येति मत्वार्थालंकारयोरपि एकवाचकानुप्रवेशे संकरमुदाजहार। सपुष्क
रद्योतितरंगशोभि न्यमंस्मारध्वमदंगबाधे। उद्यानवापीपयसीव यस्यामेणीदृशो
नाट्यगृहे रमंते। अत्र नाट्यगृहे वापीपयसोः सपुष्करेत्यादिविशेषणे शब्दसाम्यं
श्लेषः। अमंदमारध्वेत्यादिविशेषणेर्धसाम्यमुपमा। तदुभयमेकस्मिन्निवश
ब्देनप्रविष्टमिति। तदपि न मन्यामहे। सपुष्करेत्यादिविशेषणेपि श्लेषभित्तिकाअ
भेदाध्यवसायरूपातिशयोक्तिलभ्यस्य धर्मसाम्यस्यैव तत्रैव शब्दप्रतिपाद्यतया
शब्दसाम्यस्य न प्रतिपाद्यत्वात्। श्लेषभित्तिकाभेदाध्यवसायेन धर्मसाम्य
लाभानंगीकारे। अहो रागवती संध्या जहाति स्वयमंबरमित्यादिश्लिष्टविशे ५४
षणसमासोक्त्युदाहरणे विशेषणसाम्याभावे न समासोक्त्यभावप्रसंगात्॥

शब्दसाम्यस्यैव शब्दप्रतिपाद्यत्वेपि तस्योपमावाचकत्वस्यैव प्राधान्याच्छ्लेषवाचकत्वालाभाच्च । श
ब्दतोर्थतो वा कविसंमतसाम्यप्रतिपादने सर्वविधेष्वप्युपमालंकारस्वीकारात् । अन्यथा यथा
प्रह्लादनाच्चंद्रः प्रतापात्तपनो यथा । तथैव सोभूदन्वर्थो राजा प्रकृतिरंजनात् । इत्यत्राप्युप
मानं स्यात् । न ह्यत्रान्वर्थनामरूपशब्दसाम्यं विना किंचिदर्थसाम्यं कविविवक्षितमस्ति । त
स्माद्यत्रैकस्मिन्नर्थे प्रतिपाद्यमानेऽलंकारद्वयलक्षणयोगादलंकारद्वयप्रतीतिस्तत्र
तयोरलंकारयोरेकवाचकानुप्रवेशः । तथा । विधुकरपरिरंभादात्तनिष्यंदपूर्णैः शशि लम
दृषदुपक्लृप्तैरालवालैस्तरूणां । विफलितजलसेकप्रक्रियागौरवेण व्यरचि स हृतचित्त
स्तत्र भैमीवनेन । अत्र हि प्रतिपाद्यमानोर्थः समृद्धिमद्वस्तुवर्णनमुदात्तमिति लक्ष
णानुसारादुदात्तालंकाररूपः । असंबंधे संबंधकथनमतिशयोक्तिरिति लक्षणाद
तिशयोक्तिरूपश्च । न च सर्वत्रोदात्तस्यासंबंधे संबंधवचनरूपत्वं निपातितमिति
न विविक्तोलंकारद्वयलक्षणसमावेशोस्तीति वाच्यं । दिव्यलोकगतसंपत्समृद्धिव
र्णनादिष्वतिशयोक्त्यसंपृक्तस्योदात्तस्य शौर्यौदार्यादिविषयातिशयवर्णनेषू
दात्तास्पृष्टायाश्चातिशयोक्तेश्च परस्परविविक्ततयाविश्रांतेः । तयोश्चेहार्थ
वशासंपन्नसमावेशयोर्नांगांगिभावः । एकेनापरस्यानुत्थापनात्स्वातंत्र्य

नैद:

ारं तत्र यदि विशेषादृष्टौ नाङ्ग नापि समप्राधान्यं यैः शब्दैरिह संसृष्टिमवस्तु प्रतिपाद्यते तैरेव नु
वस्तुनोः संबंधे संबंधरूपस्य प्रतिपाद्यमानतयाभिन्नप्रतिपादकशब्दव्यवस्थितार्थते
दभावात्। नापि संदेहसंकरः। एकालंकारकोट्यंतरालंकारकोटिप्रतिक्षेपाभावात्। त
स्मादिहोदात्तातिशयोक्त्योरेकवाचकानुप्रवेशलक्षणः संकरः। कश्चित्संकराणामपि
संकरोऽदृश्यत। यथा मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः प्रातः प्रांगण
सीम्नि मंथरचलद्बालांघ्रिलाक्षारुणाः। दूराद्दाडिमबीजशंकितधियः कर्षंति केलीशु
का यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितं। अत्र तावद्विद्वांसंपत्समृद्धिवर्णन
मुदात्तालंकारः। तन्मूलकोऽबालांघ्रिलाक्षारुणा इत्यत्र तद्गुणालंकारः। तत्रैव व
क्ष्यमाणभ्रांत्युपपादकः पदार्थहेतुकः काव्यलिंगालंकारश्चेति तयोरेकवाचकानुप्र
वेशसंकरः। तन्मूलकः शंकितधिय इत्यत्र भ्रांतिमदलंकारः। ताभ्यां चोदात्तालंका
रस्याग्र तांगीत इति। तयोश्चोदात्तस्य चांगांगिभावसंकरः। एवंविधविद्वद्गृहवैभव
वर्णनस्य हेतुमतो राज्ञो वितरणविलासस्य हेतोश्चाभेदकथनं हेत्वलंकारः।
स च राज्ञो वितरणविलासस्य निरतिशयोत्कर्षाभिव्यक्तिपर्यवसायी। एतावान्मा
त्रे कविसंरंभश्चेदुक्तरूपोदात्तालंकारपरिष्कृते हेत्वलंकारे विश्रांतिः। कीदृशी सं ५५

पारितिप्रश्नोत्तरतया निरतिशयैश्वर्यवितरणरूपाप्रस्तुतकार्यमुखेन तदीयसंपदुत्कर्ष
प्रशंसने संरंभश्चेत्कार्यनिबंधनाप्रस्तुतप्रशंसालंकारविश्रांतिः। कार्यस्यापि वर्ण
नीयत्वेन प्रस्तुतत्वाभिप्राये तु प्रस्तुतांकुरविश्रांतिः। अत्र विशेषानध्यवसाया
त्संदेहसंकरः। किंच। विद्रुमद्रुवैभववर्णनस्यासंबंधे संबंधकथनरूपतयातिशयो
क्तेरुदात्तालंकारेण सहैकवाचकानुप्रवेशसंकरः। निरतिशयवितरणोत्कर्षपर्यव
सायिनो हेत्वलंकारस्याद्भुतातथ्योदार्यवलीनाऽस्निकयाभुक्त्या सहैकवाचानुप्रवेश
संकरः। वाचकशब्दस्य प्रतिपादकमात्रेपरतया व्यंजकसाधारण्यात्तेषां च त्रया
प्ति णामेकवाचकानुप्रवेशसंकराणां समप्राधान्यसंकरः। न ह्येतेषां परस्परमन्य
त्रवांगत्वमस्ति। उदात्तादिमात्रस्यैव हेत्वलंकारादिचारुतापादकत्वेनातिशयो
क्तिसंकरस्यांगतायानपेक्षणात्। एवमत्रश्लोके चतुर्णामपि संकराणां यथा
योग्यं संकरः। एवमन्यत्राप्युदाहरणांतराण्यूह्यानि। अमुं कुवलयानंद
प्प करोद्यथर्थं दीक्षितः। नियोगाद्वेंकटपतेर्निरुपाधिकृपानिधेः॥१॥ चंद्रालो
को विजयते शारदागमसंभवः। हृद्यः कुवलयानंदो यत्प्रसादादभूदयम्॥

५९ इतिश्रीमद्दीक्षितस्य कृतिः कुवलयानंदः ॥ छ ॥ छ ॥ छ ॥ श्री हरो जयति ॥ = ॥ छ
शके १६८८ व्ययसंवत्सरे याम्यायने हेमंतर्त्तौ [illegible]षसु कृद्दशम्यां भुक्रे भरण्यर्क्षे सा
ध्ययोगे सिंहस्थे गुरौ काले गौतमगोत्रोद्भूत जगन्नाथ भट्टात्मज शंकर किंकर शं
कर नाम्ना लिखितोयं कुवलयानंदाख्यो ग्रंथः समाप्तिमितः ॥ = ॥ छ ॥ श्री शिवः ॥ =

उपमा	१	अपह्नुति	७	सहोक्ति	१६	आक्षे
अनन्वय	३	उत्प्रेक्षा	८	विनयोक्ति	१६	विरोधा
उपमेयोपमा	३	अतिशयोक्ति	११	समासोक्ति	१६	विभाव
प्रतीप	३	तुल्ययोगिता	१२	परिकर	१७	विशेषो
रूपक	४	दीपक	१३	परिकरांकुर	१७	असं
परिणाम	५	आवृत्तिदीपक	१३	श्लेष	१७	असं
उल्लेख	६	प्रतिवस्तूपमा	१३	अप्रस्तुतप्रशंसा	१९	विष
स्मृति	६	दृष्टांत	१४	प्रस्तुतांकुर	२३	स
भ्रांति	६	निदर्शना	१४	पर्यायोक्ति	२३	
संदेह	६	व्यतिरेक	१५	व्याजस्तुति	२४	
				व्याजनिंदा	[illegible]	

विचित्र
अधिक
अल्प.
अन्योन्य
विशेष
व्याघात
कारणमाला
एकावली
मालादीपक
सार
यथासंख्य
पर्याय
परिवृत्ति
परिसंख्या
विकल्प
समुच्चय

कारकदीपक
समाधि
प्रत्यनीक
अर्थापत्ति
काव्यलिंग
अर्थांतरन्यास
विकस्वर
प्रौढोक्ति
संभावना
मिथ्याध्यवसितिः
ललित
प्रहर्षण
विषादन
उल्लास
अवज्ञा
अनुज्ञा

लेश
मुद्रा
रत्नावली
तद्गुण
पूर्वरूप
अतद्गुण
अनुगुण
मीलित
सामान्य
उन्मीलित
विषयिक
उत्तर
सूक्ष्म
पिहित
व्याजोक्ति
मूढोक्ति

यु
लोको
छेकोक्ति
वक्रोक्ति
स्वभावोक्ति
भाविक
उदात्त
अत्युक्ति
निरुक्ति
प्रतिषेध
विधि
हेतु
रसवत्
प्रिय
उर्ज
सम

भावोदय
भावसंधि
भावशबलता
प्रत्यक्ष
अनुमान
उपमान
शब्द
अर्थापत्ति
अनुपलब्धि
संभव
ऐतिह्य
संसृष्टि
अंगांगिभावसंकर
समप्राधान्यसंकर
संदेहसंकर

एकवाचकानुप्रवेशसंकर
संकरसंकर
श्रीगंगाधरेराजपति

```
[OrderDescription]
,CREATED=14.07.20 11:41
,TRANSFERRED=2020/07/14 at 11:57:07
,PAGES=117
,TYPE=STD
,NAME=S0003309
,Book Name=M-2703-SHRIKUVALYANAND MINDGYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
```

```
FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
```

```
FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
```

```
FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
```

```
FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
```

```
FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
```

```
FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,
```